Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशाय नमः ।

# यन्त्रराजो

## मलयेन्दुसूरिकृतटीकासहितः ।

ीसर्वज्ञपदाम्बुजं हृदि परामृश्य प्रभाव्यं परं
ीमन्तं मदनाख्यसूरिसुगुरुं कल्याणकल्पद्रुमम् ।
िकानां हितकाम्यया प्रकुरुते सद्यन्त्रराजागमं
ानाभेदयुतं चमत्कृतिकरं सूरिर्महेन्द्राभिधः ॥१॥

प्रणम्य सर्वज्ञपदारविन्दं सूरेर्महेन्द्रस्य पदाम्बुजं च ।
तनोति तद्गुम्फितयन्त्रराजग्रन्थस्य टीकां मलयेन्दुसूरिः ।

अथ प्रथमतः प्रतिचिकीर्षितस्य सकलगणितसारभूतस्य यन्त्रराजग्रन्थस्य निरन्तरान्तरायनिर्वापणाय शिष्टाचारपरिपालनाय शिष्यप्रतिशिष्यपरम्परासुप्रचयगमनाय भक्तजनमनःसंकल्पकल्पद्रुमायमाणस्वाभीष्टदेवतागुरुनमस्कारपूर्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

026925
inmandir@kobatirth.org



ततः स्वल्पं सारं विषदमिदमत्यन्तसुगमं
वितन्वेऽहं शास्त्रं सहृदयहृदानन्दकृतये ॥२॥
कृतास्तथा बहुविधा यवनैः स्वबाख्यां
यन्त्रागमा निजनिजप्रतिभाविशेषात् ।
तान् वारिधीनिव विलोक्य मया सुधाव-
त्तत्सारभूतमखिलं प्रणिगद्यतेऽत्र ॥ ३ ॥

स्पष्टार्थम् ।

अथ सूत्रकृदेव यन्त्रराजमहिमानमाचष्टे ।

यथा भटः प्रौढरणोत्कटोऽपि
शस्त्रैर्विमुक्तः परिभूतिमेति ।
तद्वन्महाज्ज्योतिषनिस्तुषोऽपि
यन्त्रेण हीनो गणकस्तथैव ॥ ४ ॥

इदमपि स्पष्टार्थम् ।

अथ भुजकोट्योः क्रमोत्क्रमज्यानयनम् ।

यत्स्याल्लवादाः कलिकादिकं त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥२॥ अस्य व्याख्या भुजज्याकोटिज्यानयने भुजकोटिभागानामधस्ताद्यदि कलादिकं भवति तदा तदतीतभोग्यान्तरखण्डकेन गुणितं च षष्ट्या हृतं लब्धं फले चिप्तं प्रत्येकं क्रमोत्क्रमे च भुजमौर्वी कोटिमौर्वी च स्यात्। अत्रोदाहरणम्। रवे: परमक्रान्तिभागा: २३ कला: ३५ एषां भुजज्यानयनार्थमेत एव भुजांशा: कल्पिता राशित्रयस्य भुज इति संज्ञा तत्रैको राशि: त्रिंशदंशा: एतेषां भुजज्यानयनं यथा क्रमज्याकोष्ठकेषु त्रयोविंशत्यंशानामधस्तात्प्राप्तं फलं कला: १४०६ विकला: ३८ तदधोऽन्तरं ५७।२६ अनेनान्तरेण भुजभागानामध:स्थिता: कला: ३५ गुणिता जाता १९८५।१२६०

अध:स्थाङ्कस्य षष्ट्या भागे लब्धं उपरि चिप्तं जाता विकला २०१६ एषां षष्ट्या भागे लब्धा: कला: ३३ विकला: ३६ पूर्वोक्ते १४०६।३८ एवंरूपे योजिता: परमक्रान्तिभागानां क्रमेण भुजज्या कलादिका १४४०।१५ अथ क्रमेण कोटिज्यानयनम्। यथा रवे: परमक्रान्त्यंशा एव भुजभागा: २३ कला: ३५ एते नवते: शोध्यन्ते शेषांशा: ६६। कला: १५ एते कोटिभागा जाता: तत: क्रमज्याकोष्ठकेषु षट्षष्टिभागानामध: प्राप्तं फलं कला: ३२८८ विकला: ४६ तदधोऽन्तरं २५।३ अनेनान्तरेण कोटिभागानामध:स्थिता: कला: २५ गुणिता जाता: ६२५।१५ अधोऽङ्कस्य षष्ट्या भागे लब्धमेकं तस्मिन्नुपरि चिप्ते जाता विकला: ६२६ एषां षष्ट्या भागे लब्धा: कला: १० विकला: २६ एतदुपरितनाङ्के ३२८८।४६ क्रमेण चिप्ते जाता परमक्रान्तिकोटिभागानां कलादिका जीवा ३२९९।१२ अथ पूर्वोक्त एव भुजभागा: २३।३५ तत: उत्क्रमज्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोष्ठकेषु त्रयोविंशतिभागानामधः प्राप्तं फलं कलाः २८६ विकलाः ११ तदधःस्थमन्तरं २५।३ अनेनाङ्केन भुजभागानामधःस्थकला २५ हन्यन्ते जाताः ८७५ अधोऽङ्कस्य १०५ षष्ट्या भागे लब्धमेकं १ उपरि चिप्ते जाता विकलाः ८७६ एतेषां षष्ट्या भागे लब्धाः कलाः १४ विकलाः ३६ एताः पूर्वोक्तकोष्ठकाङ्क २८६।११ मध्ये योजनीयाः परमक्रान्तेरुत्क्रमज्या ३००।४७ कलादिका। अथोत्क्रमेण कोटिज्यानयनम्। पूर्वोक्ता एव कोटिभागाः ६६।२५ तत उत्क्रमज्याकोष्ठकेषु षट्षष्टिभागानामधस्तत्प्राप्तं फलं कलाः २१३५ विकलाः ४५ तदधोऽन्तरं ५७।३६ अनेन कोटिभागानामधःस्थिताः कला २५ गुणिता जाताः। १४२५।९०० अधःस्थाङ्कस्य षष्टिभागे लब्धाविकलाः १५ एतासां पूर्वराशिक्षेपे जाता विकलाः १४४० एतासां षष्ट्या भागे लब्धाः कलाः २४ एताः पूर्वोक्तफलाङ्के २१३५।४५ न्यस्यन्ते जाता परक्रान्तिकोटिभागानां कलादिका उत्क्रमज्या २१५९।४५ एवं सर्वत्र क्रमोत्क्रमाभ्यां भुजज्याकोटिज्यासाधनम् ।

अथ भुजज्याकोटिज्यातश्चापसाधनम् ।

गते फलाङ्के भुजकोटिमौर्व्यो-
स्तदूर्ध्वगाश्चापलवाः स्थिताङ्काः ।
षष्ट्या हतं चान्तरकोष्टभक्तं
क्रमोत्क्रमाभ्यां तदधः कलादि ॥ ६ ॥

अत्र व्याख्या पूर्वं भुजज्याकोटिज्यासाधिता तस्याः प्रत्यंशफ-

For Private And Personal Use Only

लब्ध्याङ्कपातिते तदूर्ध्वकोष्ठाङ्का धनुरंशा भवन्ति शेषं षष्ट्या गुणितं तत्कोष्ठकाधःस्थितान्तराङ्केन विभक्तं धनुरं-

क्रमज्याज्ञानार्थं सारणी ।

| भागाः | १ | २ | ३ | ४ | ५ | ६ |
|---|---|---|---|---|---|---|
| क्रमज्या | ६२<br>५० | १२५<br>३८ | १८८<br>२५ | २५१<br>७ | ३१३<br>४५ | ३७६<br>१८ |
| अन्तरं | ६२<br>४८ | ६२<br>४७ | ६२<br>४२ | ६२<br>३८ | ६२<br>३३ | ६२<br>२६ |

क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ७ | ८ | ९ | १० | ११ | १२ |
|---|---|---|---|---|---|---|
| क्रमज्या | ४३८<br>४४ | ५०१<br>१ | ५६३<br>१० | ६२५<br>८ | ६८६<br>५५ | ७४८<br>२९ |
| अन्तरं | ६२<br>१७ | ६२<br>९ | ६१<br>५८ | ६१<br>४७ | ६१<br>३४ | ६१<br>२० |

## क्रमज्याज्ञानार्थं सारणी।

| भागाः | १३ | १४ | १५ | १६ | १७ | १८ | १९ |
|---|---|---|---|---|---|---|---|
| क्रमज्या | ८०९<br>४९ | ८७०<br>५५ | ९३१<br>४५ | ९९२<br>१८ | १०५२<br>३२ | १११२<br>२८ | ११७२<br>३ |
| अन्तरं | ६१<br>६ | ६०<br>५० | ६०<br>३४ | ६०<br>१४ | ५९<br>५६ | ५९<br>३५ | ५९<br>१३ |

## क्रमज्याज्ञानार्थं सारणी।

| भागाः | २० | २१ | २२ | २३ | २४ | २५ | २६ |
|---|---|---|---|---|---|---|---|
| क्रमज्या | १२३१<br>१६ | १२९०<br>८ | ३१४०<br>३६ | १४०६<br>३९ | १४६४<br>१५ | १५२१<br>२६ | १५७८<br>८ |
| अन्तरं | ५८<br>५२ | ५८<br>२९ | ५८<br>३ | ५७<br>३६ | ५७<br>११ | ५६<br>४२ | ५६<br>१४ |

क्रमज्याज्ञानार्थं सारणी ।

| भागा: | २७ | २८ | २९ | ३० | ३१ | ३२ | ३३ |
|---|---|---|---|---|---|---|---|
| क्रमज्या: | १६३४<br>२२ | १६९०<br>६ | १७४५<br>९ | १८००<br>० | १८५४<br>८ | १९०७<br>४३ | १९६०<br>४२ |
| अन्तरम् | ५५<br>४४ | ५५<br>१३ | ५४<br>४१ | ५४<br>८ | ५३<br>३५ | ५२<br>५९ | ५२<br>२४ |

क्रमज्याज्ञानार्थं सारणी ।

| भागा: | ३४ | ३५ | ३६ | ३७ | ३८ | ३९ | ४० |
|---|---|---|---|---|---|---|---|
| क्रमज्या: | २०१३<br>६ | २०६४<br>५२ | २११६<br>१ | २१६६<br>३२ | २२१६<br>२३ | २२६५<br>३३ | २३१४<br>२ |
| अन्तरम् | ५१<br>४६ | ५१<br>९ | ५०<br>३१ | ४९<br>५१ | ४९<br>१० | ४८<br>२९ | ४७<br>४७ |

## क्रमज्याज्ञानार्थं सारणी।

| भागा: | ४१ | ४२ | ४३ | ४४ | ४५ | ४६ | ४७ |
|---|---|---|---|---|---|---|---|
| क्रमज्या: | २३६१ ४९ | २४०८ ५२ | २४५५ ११ | २५०० ४६ | २५४५ ३५ | २५८९ ३७ | २६३२ ५२ |
| अन्तरम् | ४७ ३ | ४६ १९ | ४५ ३५ | ४४ २९ | ४४ २ | ४३ १५ | ४२ २७ |

## क्रमज्याज्ञानार्थं सारणी।

| भागा: | ४८ | ४९ | ५० | ५१ | ५२ | ५३ | ५४ |
|---|---|---|---|---|---|---|---|
| क्रमज्या: | २६७५ १९ | २७१६ ५७ | २७५७ ४५ | २७९७ ४३ | २८३६ ५० | २८७५ ५ | २९१२ २७ |
| अन्तरम् | ४१ ३८ | ४० ४८ | ३९ ५८ | ३९ ७ | ३८ १५ | ३७ २२ | ३६ २९ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ५५ | ५६ | ५७ | ५८ | ५९ | ६० | ६१ |
|---|---|---|---|---|---|---|---|
| क्रम-ज्या | २९४८ ५७ | २९८४ ३२ | ३०१९ १३ | ३०५३ ५८ | ३०८५ ४८ | ३११७ ४१ | ३१४८ ३८ |
| अन्तरं | ३५ ३५ | ३४ ४१ | ३३ ४५ | ३२ ५० | ३१ ५३ | ३० ५७ | २९ ५९ |

क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ६२ | ६३ | ६४ | ६५ | ६६ | ६७ | ६८ |
|---|---|---|---|---|---|---|---|
| क्रम-ज्या | ३१७८ ३७ | ३२०७ ३७ | ३२३५ ४० | ३२६२ ४२ | ३२८८ ४६ | ३३१३ ४९ | ३३३७ ५२ |
| अन्तरं | २९ ० | २८ ३ | २७ २ | २६ ४ | २५ ३ | २४ ३ | २३ १ |

For Private And Personal Use Only

## क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ६९ | ७० | ७१ | ७२ | ७३ | ७४ | ७५ |
|---|---|---|---|---|---|---|---|
| क्रमज्या | ३३६० ५३ | ३३८२ ५४ | ३४०३ ५२ | ३४२३ ४८ | ३४४२ ४२ | ३४६० ३३ | ३४७७ २० |
| अन्तरं | २२ १ | २० ५८ | १९ ५६ | १८ ५४ | १७ ५१ | १६ ४७ | १५ ४४ |

## क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ७६ | ७७ | ७८ | ७९ | ८० | ८१ | ८२ |
|---|---|---|---|---|---|---|---|
| क्रमज्या | ३४९३ ४ | ३५०७ ४४ | ३५२१ २० | ३५३३ ६१ | ३५३५ १९ | ३५५५ ४१ | ३५६४ ५८ |
| अन्तरं | १४ ४० | १३ ३६ | १२ ४१ | ११ २८ | १० १२ | ९ १७ | ८ १२ |

## क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ८३ | ८४ | ८५ | ८६ | ८७ | ८८ | ८९ | ९० |
|---|---|---|---|---|---|---|---|---|
| क्रमज्या | ३५७३ १० | ३५८० ५६ | ३५८६ ९ | ३५९१ १४ | ३५९५ ४ | ३५९७ ४८ | ३५९९ २७ | ३६०० ० |
| अन्तरं | ७ ४६ | ५ २३ | ४ ५५ | ३ ५० | २ ४४ | १ २९ | ० ३३ | ० ० |

## अथोत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | १ | २ | ३ | ४ | ५ | ६ | ७ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | ० ३३ | २ १२ | ४ ५६ | ८ ४६ | १३ ४१ | १९ ४ | २६ ५० |
| अन्तरं | १ २९ | २ ४ | ३ ५० | ४ ५५ | ५ २३ | ७ ४६ | ८ १२ |

## उत्क्रमज्यामानार्थं सारणी ।

| भागाः | ८ | ९ | १० | ११ | १२ | १३ | १४ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | ३५<br>२ | ४४<br>९ | ५४<br>४१ | ६६<br>९ | ७८<br>४० | ९२<br>१६ | १०६<br>५६ |
| अन्तरं | ९<br>१७ | १०<br>२२ | ११<br>२८ | १२<br>३१ | १३<br>३६ | १४<br>४० | १५<br>४४ |

## उत्क्रमज्यामानार्थं सारणी ।

| भागाः | १५ | १६ | १७ | १८ | १९ | २० | २१ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | १२२<br>४० | १३९<br>२७ | १५७<br>१८ | १७६<br>१२ | १९६<br>८ | २१७<br>६ | २३९<br>७ |
| अन्तरं | १६<br>४७ | १७<br>५१ | १८<br>५४ | १९<br>५६ | २०<br>५८ | २२<br>१ | २३<br>१ |

### उत्क्रमज्याज्ञानार्थं सारणी।

| भागाः | २२ | २३ | २४ | २५ | २६ | २७ | २८ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | २६२<br>८ | २८६<br>११ | ३११<br>१४ | ३३७<br>१८ | ३६४<br>२० | ३९२<br>२३ | ४२१<br>२३ |
| अन्तरं | २४<br>३ | २५<br>३ | २६<br>४ | २७<br>२ | २८<br>३ | २९<br>० | २९<br>४९ |

### उत्क्रमज्याज्ञानार्थं सारणी।

| भागाः | २९ | ३० | ३१ | ३२ | ३३ | ३४ | ३५ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | ४५१<br>२२ | ४८२<br>१९ | ५१४<br>१२ | ५४७<br>२ | ५८०<br>४७ | ६१५<br>२८ | ६५१<br>४ |
| अन्तरं | ३०<br>५७ | ३१<br>५३ | ३२<br>५० | ३३<br>४५ | ३४<br>४१ | ३५<br>३६ | ३६<br>२९ |

उत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ३६ | ३७ | ३८ | ३९ | ४० | ४१ | ४२ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | ६८७<br>३२ | ७२४<br>५५ | ७६३<br>१० | ८०२<br>१७ | ८४२<br>१५ | ८८३<br>३ | ९२४<br>४१ |
| अन्तरम् | ३७<br>२२ | ३८<br>१५ | ३९<br>७ | ३९<br>५८ | ४०<br>४८ | ४१<br>३८ | ४२<br>२७ |

उत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ४३ | ४४ | ४५ | ४६ | ४७ | ४८ | ४९ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | ९६७<br>८ | १०१०<br>२३ | १०५४<br>२५ | १०९९<br>१४ | ११४४<br>४९ | ११९१<br>८ | १२३८<br>११ |
| अन्तरं | ४३<br>२५ | ४४<br>२ | ४४<br>४९ | ४५<br>३५ | ४६<br>१९ | ४७<br>१३ | ४७<br>४७ |

उत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ५० | ५१ | ५२ | ५३ | ४५ | ५५ | ५६ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | १२८५<br>५८ | १३३४<br>२७ | १३८३<br>३७ | १४३३<br>२८ | १४८३<br>५९ | १५३५<br>८ | १५८६<br>४५ |
| अन्तरं | ४८<br>२९ | ४९<br>१० | ४९<br>५१ | ५०<br>३१ | ५१<br>९ | ५१<br>४६ | ५२<br>२४ |

उत्क्रमज्यांज्ञानार्थं सारणी ।

| भागाः | ५७ | ५८ | ५९ | ६० | ६१ | ६२ | ६३ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | १६३८<br>१८ | १६९२<br>१७ | १७४५<br>५२ | १८००<br>० | १८५४<br>४१ | १९०९<br>५४ | १९६५<br>३८ |
| अन्तरं | ५२<br>५९ | ५३<br>३५ | ५४<br>८ | ४५<br>४१ | ५५<br>१३ | ५५<br>४४ | ५६<br>१३ |

उत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ६४ | ६५ | ६६ | ६७ | ६८ | ६९ | ७० |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | २०२१<br>५२ | २०७८<br>३४ | २१३५<br>४५ | २१९३<br>२१ | २२५१<br>२४ | २३०९<br>५२ | २३६८<br>४४ |
| अन्तरम् | ५६<br>४२ | ५७<br>११ | ५७<br>३६ | ५८<br>३ | ५८<br>२८ | ५८<br>५२ | ५९<br>१३ |

उत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ७१ | ७२ | ७३ | ७४ | ७५ | ७६ | ७७ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | २४२७<br>५७ | २४८७<br>३२ | २५४७<br>२८ | २६०७<br>४२ | २६६८<br>१५ | २७२९<br>५ | २७९०<br>११ |
| अन्तरम् | ५९<br>३५ | ५९<br>५६ | ६०<br>१४ | ६०<br>३३ | ६०<br>५० | ६१<br>६ | ६१<br>२० |

### उत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ७८ | ७९ | ८० | ८१ | ८२ | ८३ | ८४ |
|---|---|---|---|---|---|---|---|
| उत्क्रमज्याः | २८५१<br>२१ | २९१२<br>५ | २९७४<br>५२ | ३०३६<br>५० | ३०९८<br>५८ | ३१६१<br>१४ | ३२२३<br>४२ |
| अन्तरम् | ६१<br>३४ | ६१<br>४७ | ६१<br>५८ | ६२<br>८ | ६२<br>१७ | ६२<br>२६ | ६२<br>३३ |

### उत्क्रमज्याज्ञानार्थं सारणी ।

| भागाः | ८५ | ८६ | ८७ | ८८ | ८९ | ९० |
|---|---|---|---|---|---|---|
| उत्क्रमज्याः | ३२८६<br>१५ | ३३४८<br>५२ | ३४११<br>३५ | ३४७४<br>२२ | ३५३७<br>१० | ३६००<br>० |
| अन्तरम् | ६२<br>३८ | ६२<br>४२ | ६२<br>४७ | ६२<br>४८ | ६२<br>५० | ६२<br>५० |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भानामधस्ताद्यस्तं कलादिकं भवति १४४० । २५ अस्या मध्ये चयोविंशतितमकोष्ठकाधःस्थितक्रमज्याकोष्ठकाङ्का: १४०६ । ३८ पात्यन्ते शेषं ३२ । ४६ षष्ट्या गुणिते जाताः २०२६ एते अधः कोष्ठकान्तराङ्केन ५७३६ विभज्यन्ते लब्धं कलाः ३५ एवं भुजज्यातो धनुरंशाः २३ । ३५ सपला एव भुजज्यातः कोटिज्यातश्च क्रमोत्क्रमाभ्यां चापसाधनं कार्यम् ।

अथ प्रतिभागं राशित्रयस्य क्रान्तयः सान्तरा लिख्यन्ते तद्यथा

क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ० | १ | २ | ३ |
|---|---|---|---|---|
| क्रान्ति-कलाः | ०<br>० | २४<br>० | ४८<br>० | ७१<br>५९ |
| अन्तरं | २४<br>० | २४<br>० | २३<br>५९ | २३<br>५८ |

क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ४ | ५ | ६ | ७ |
|---|---|---|---|---|
| क्रान्ति-कलाः | ९५<br>५७ | ११९<br>५४ | १४३<br>४९ | १६७<br>४० |
| अन्तरं | २३<br>५७ | २३<br>५५ | २३<br>५१ | २३<br>५० |

For Private And Personal Use Only

क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ८ | ९ | १० | ११ | १२ | १३ | १४ |
|---|---|---|---|---|---|---|---|
| क्रान्ति- | १९१ | २१५ | २३९ | २६२ | २८[illegible] | ३०९ | ३३३ |
| कलाः | ३० | १८ | २ | ४२ | १७ | ४८ | १६ |
| अन्तरं | २३ | २३ | २३ | २३ | २३ | २३ | २३ |
| | ४८ | ४४ | ४० | ३५ | ३१ | २८ | २१ |

क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | १५ | १६ | १७ | १८ | १९ | २० | २१ |
|---|---|---|---|---|---|---|---|
| क्रान्ति- | ३५६ | ३७९ | ४०३ | ४२६ | ४४९ | ४७१ | ४९४ |
| कलाः | २७ | ५३ | २ | ५ | २ | ५३ | ३६ |
| अन्तरं | २३ | २३ | २३ | २२ | २२ | २२ | २२ |
| | १६ | ९ | ३ | ५७ | ५१ | ४३ | ५३ |

क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | २२ | २३ | २४ | २५ | २६ | २७ | २८ |
|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | ५१७<br>११ | ५३९<br>३६ | ५६१<br>५५ | ५८४<br>४ | ६०६<br>३ | ६२७<br>५४ | ६४९<br>३३ |
| अन्तरं | २२<br>२५ | २२<br>१९ | २२<br>९ | २१<br>५९ | २१<br>५१ | २१<br>३९ | २१<br>३० |

क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | २९ | ३० | ३१ | ३२ | ३३ | ३४ | ३५ |
|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | ६७१<br>३ | ६९२<br>२२ | ७१३<br>२८ | ७३५<br>२५ | ७५५<br>९ | ७७५<br>४० | ७९५<br>५९ |
| अन्तरम् | २१<br>१९ | २१<br>६ | २०<br>५७ | २०<br>४४ | २०<br>३१ | २०<br>१९ | २०<br>५ |

## क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ३६ | ३७ | ३८ | ३९ | ४० | ४१ | ४२ |
|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | ८१६ ४ | ८३५ ५५ | ८५५ ३९ | ८७४ ५९ | ८९४ ६ | ९१३ ४१ | ९३१ ४४ |
| अन्तरम् | १९ ५१ | १९ ४४ | १९ २० | १९ ७ | १८ ५५ | १८ ४३ | १८ १८ |

## क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ४३ | ४४ | ४५ | ४६ | ४७ | ४८ | ४९ |
|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | ९५० ० | ९६८ ९ | ९८६ १ | १००३ ३४ | १०२० ४८ | १०३७ ४९ | १०५४ २९ |
| अन्तरम् | १८ ७ | १७ ५२ | १७ ३३ | १७ १४ | १७ १ | १६ ४० | १६ २१ |

## क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ५० | ५१ | ५२ | ५३ | ५४ | ५५ | ५६ |
|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | १०७०<br>५० | १०८६<br>५३ | ११०२<br>३८ | १११८<br>२ | ११३३<br>६ | ११४७<br>५० | ११६२<br>१५ |
| अन्तरम् | १६<br>३ | १५<br>४५ | १५<br>२४ | १५<br>४ | १४<br>४४ | १४<br>२५ | १४<br>४ |

## क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ५७ | ५८ | ५९ | ६० | ६१ | ६२ | ६३ |
|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | ११७६<br>१९ | ११९०<br>० | १२०३<br>२० | १२१६<br>२० | १२२८<br>५७ | १२४१<br>११ | १२५३<br>१ |
| अन्तरम् | १३<br>४१ | १३<br>२० | १३<br>० | १२<br>३७ | १२<br>१४ | ११<br>५० | ११<br>२८ |

## क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ६४ | ६५ | ६६ | ६७ | ६८ | ६९ | ७० |
|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | १२६४ २९ | १२७५ ३५ | १२८६ १० | १२९६ ३४ | १३०६ २७ | १३१५ ५४ | १३२४ ५९ |
| अन्तरम् | ११ ६ | १० ३५ | १० २४ | ९ ५२ | ९ २७ | ९ ५ | ८ ३८ |

## क्रान्तिज्ञानार्थं सारणी ।

| भुजभागाः | ७१ | ७२ | ३७ | ७४ | ७५ | ७६ | ७७ | ७८ |
|---|---|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | १३३३ २७ | १३४१ ५३ | १३४९ ५२ | १३५७ १५ | १३६४ १ | १३७० ३२ | १३७६ ३५ | १३८२ १४ |
| अन्तरम् | ८ १६ | ७ ४९ | ७ २३ | ६ ५६ | ६ ३१ | ६ ३ | ५ ३९ | ५ १३ |

## क्रान्तिज्ञानार्थं सारणी।

| भुजभागाः | ७९ | ८० | ८१ | ८२ | ८३ | ८४ |
|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | १३८७<br>२० | १३९२<br>१४ | १३९६<br>३२ | १४००<br>२५ | १४०३<br>५० | १४०६<br>४६ |
| अन्तरम् | ४<br>४७ | ४<br>१८ | ३<br>५३ | ३<br>२५ | २<br>५६ | २<br>३२ |

## क्रान्तिज्ञानार्थं सारणी।

| भुजभागाः | ८५ | ८६ | ८७ | ८८ | ८९ | ९० |
|---|---|---|---|---|---|---|
| क्रान्ति-कलाः | १४०९<br>१८ | १४११<br>२२ | १४१२<br>५८ | १४१४<br>५ | १४१४<br>४७ | १४१५<br>० |
| अन्तरम् | २<br>४ | १<br>३६ | १<br>७ | ०<br>४२ | ०<br>१३ | ०<br>० |

इति क्रान्तिकोष्ठकाः समाप्ताः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ क्रान्त्यानयनम् ।

लवादधस्थत्कलिकादिकं स्या-
द्गतीतभोग्यान्तरताडितं तत् ।
षष्ट्या हृतं भुक्तफलेन युक्तं
यन्त्रे स्फुटाः क्रान्तिलवा भवन्ति ॥ ७ ॥

अस्य व्याख्या लवानां भुजांशानामधस्ताद्यदि कलादिकं फलं भवति तदा तद्गतीतभोग्यान्तराङ्कताडितं षष्ट्या भक्तं भुक्तफले युक्तं च यन्त्रे स्फुटाः क्रान्तिलवा भवन्ति । अथोदाहरणम् । भुजांशाः १०।३० ततः क्रान्तिकलाकोष्ठकेषु दशांशानामधः प्राप्तं फलं कलादि २३८।२ तदग्रेऽन्तरं २३।४० अनेनान्तरेण पूर्वोक्ता त्रिंशद्गुणयते जाताः ६८०।१२०० अधोऽङ्कस्य षष्ट्या भागे लब्धं २० ते उपरि क्षिप्यन्ते जाता विकलाः ७१० आसां षष्ट्या भागे लब्धं कलाः ११ विकलाः ५० एतद्भुक्तफले २३८।२ नियुक्तं क्रान्तिकलाः सम्पन्नाः २५०।५२ एवं सर्वत्र यदि लवानामधः कलादिकं भवति तत्रैव प्रक्रिया । भुजांशाः ९० तेषामधः प्राप्तं कलादि १४१५ एता एव नवतिभागात्मकस्य राशित्रयस्य परमक्रान्तिकला भवन्ति । आसामेव क्रान्तिकलानां षष्ट्या भागे लब्धाः परमक्रान्त्यंशाः २३ कलाः ३५ एवमन्यत्रापि क्रान्तिसाधनं कार्यम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ प्रत्यंशराशिषट्कं स्वस्वाहोरात्रप्रमाणोत्पादनम् ।

*** भुजांशकानां विपरीतमौर्वी**
**मेषप्रमाणेन हता हृता च ।**
**भुजज्यया तत्क्रमया ततो य-**
**ल्लब्धं फलं तच्छकलं दिनस्य ॥ ८ ॥**

* अत्रोपपत्तिः । आचार्येण दक्षिणध्रुवं दृष्टिचिन्हं प्रकल्प्य तस्माद्गोलोपरिगतस्य कस्यापि वृत्तस्यावलोकनेन विषुववृत्तधरातले यादृगाकृतिस्तत्साधनार्थं प्रथमं गोलपृष्ठस्थस्य कस्यापि विन्दोरूपं विषुववृत्तधरातले तद्दृष्टिचिन्हाद्विषुववृत्तकेन्द्राद्व्यावतान्तरेण दृश्यन्ते तदन्तरं प्रसाध्य द्युज्याखण्डाख्यं कृतं । यथा गोलपृष्ठे कोपि व विन्दुरस्योपरि उवद ध्रुवप्रोतं कर्त्तव्यं उ, उत्तर ध्रुवं, द, दक्षिणध्रुवं के विषुववृत्तकेन्द्रं केग विषुववृत्तव्यासार्धं प्र वविन्दोः प्रतिविम्बं विषुववृत्त-




धरातले च प्रकल्प्यं । तदा केदप्र $= \frac{1}{2}$ उवचाप

तथा केप्र = स्प $\frac{1}{2}$ उव $= \dfrac{\text{त्रि.ज्या } \frac{1}{2} \text{ उव}}{\text{कोज्या } \frac{1}{2} \text{ उव}}$

$$= \frac{\text{त्रि.ज्या}^2 \frac{1}{2} \text{ उव}}{\text{ज्या} \frac{1}{2} \text{ उव.कोज्या} \frac{1}{2} \text{ उव}} = \frac{२\text{त्रि.ज्या}^2 \frac{1}{2} \text{ उव}}{२ \text{ ज्या} \frac{1}{2} \text{ उव.कोज्या} \frac{1}{2} \text{ उव}}$$

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या भुजभागानां या विपरीतमौर्वी उत्क्रमज्या सा मेषप्रमाणेन १९।३८ गुणयित्वा भुजक्रमज्यया भाज्या तत-स्तस्माल्लब्धं फलं तद्दिनस्य खण्डं भवति। अत्रोदाहरणम्। यथा प्रथमांशस्य भुजलवा: १।०।० एषामुत्क्रमज्या ०।३२ इयं मे-षप्रमाणेन १९।३८ एकरूपेण गुण्यते जाता ०।६२७।१२५४ अध:स्थाङ्कस्य षष्ट्या भागे लब्धा: २० शेषं ५४ लब्धाङ्का: २० उपरितनाङ्क ६२७ एवं रूपे योजिता: ६४७ एषामपि षष्ट्या भागे लब्धं १० उपरितनशून्यस्थाने स्थाप्यन्ते जाता: क्रमे-ण कलाद्य: १०।४७।५४ ततोऽस्या भुजक्रमज्यया ६२।५० भजनार्थं दशषष्ट्या ६० गुण्यन्ते तन्मध्ये ४७ क्षिप्यन्ते ६४७।५४ एवं भुजक्रमज्याङ्केऽपि ६२ षष्ट्या गुणिते पञ्चाशन्मिलिते जाता ३७७० एभि: पूर्वाङ्कस्य भागे लब्धं भागाद्यं ०।१० एवमेतत् प्रथमांशस्य द्युज्याफलं शकलमुच्यते एवं नवत्यंशान् यावद् द्युज्याखण्डान्युत्पादयामि।

---

$\frac{\text{त्रि.उज्याउव}}{\text{ज्याउव}}$ अथात्र यदि उव = ९० तदा केप्र = त्रि, अत: त्रिज्यामानसमं मेषादिमानं तस्मात्मिष्टं चेत्कल्प्यते तदा-नुपातो यदि त्रिज्यया पूर्वसाधितं केप्रमानं तदा मेषप्रमाणे-नाभीष्टेन किं जातं केप्र = $\frac{\text{मेमा}\cdot\text{उज्याउव}}{\text{ज्याउव}}$ अत उपपन्नं मू-लोक्तम्। नवत्यधिकानामुत्क्रमज्यां ज्यामित्या प्रसाध्याग्रिम-श्लोकोपपत्तिर्ज्ञेया।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ नवत्यधिकांशेषु द्युज्याखण्डोत्पादनम् ।

**प्रवर्द्धमाने नवतेरथांशे**
**कोटिक्रमज्यान्तिमया ३६०० तु युक्ता ।**
**तुलाजमानेन हता विभक्ता**
**क्रमज्यया वाहुजया लवादि ॥ ९ ॥**

व्याख्या नवतेरुपरि अशीत्यधिकशतपर्य्यन्तं १८० यदां प्रवृद्धिर्भवति तदा कोटिक्रमज्यया सहितायाः त्रिज्यायाः तुलाजयोर्मानेन गुणितायाः भुजक्रमज्यया भक्ताया लब्धं फलं लवादि नवत्यधिकांशानां द्युज्याखण्डं भवति । अत्रो-दाहरणम् । यथा राश्यादिकेन्द्रं ३।१।०।० केन्द्राङ्कजानयनं यथा पाश्चितयाद्‌विकल्पमधिक केन्द्रं विशोधयेत् षड्भ्यः । षडधिकमूनं षड्भिर्नवाधिकं शोधयेच्चक्रात् ॥

अस्य व्याख्या राशिभिकस्य केन्द्रमिति संज्ञा तच्च केन्द्रं पाश्चितयात् पाराशित्रयाद्‌विकल्पं तस्मान्न किञ्चित्पात्य-मित्यर्थः । तत्र केन्द्रमेव भुजः । त्र्यधिकं तत् षड्भ्यः शोधयेत् षडधिकं षड्भिरूनं कार्य्यं नवाधिकं केन्द्रं चक्रात् द्वादशा-द्विशोधयेत् सर्वत्रापि शेषांशको भुजः । अत्र त्र्यधिकं केन्द्र-मस्ति इति षड्भ्यः पूर्वोक्तकेन्द्राङ्कः शोध्यते शेषं भुजः २।२९।० अतः कोटिरानीयते राशित्रयादस्मिन् भुजे पातिते शेषं

कोटिः ॥०।१।०।० अस्याः कोटेः क्रमज्या ६२।५० अन्तिमज्या ३६०० सहिता ३६६२।५० मेषतुलामानेन १९।३८ गोमूत्रिकया गुणिता जातो राशिः ६९५७८।९५०।१३९१५६।१९०० अधःस्थाङ्कस्य षष्ठ्या भागे लब्ध ३१ एते ९५० मध्ये क्षिप्यन्ते जाता ९८१। एते १३९१५६ मध्ये क्षिप्यन्ते जाताः १४०१३७४० एषामपि षष्ठ्या भागे लब्धाः २३३५ शेष २७४० लब्धा उपर्यङ्के ६९।५७८ क्षेप्या जाताः ७१९१३।२७।४० एतेभ्यो भुजभागानां ८९ क्रमज्यया ३५९९।२७ भागे लब्ध एकनवत्यंशानां लवाद्यं द्युज्याखण्डं १९।५८ ।

अथ द्युज्याफलानामुपयोगमाह ।

**इदं भचक्रार्धभवांशकानां**
**द्युज्याफलं स्पष्टतरं यदुक्तम् ।**
**अक्षांशकेभ्यः सुधिया तदर्धं**
**केन्द्रं तथा व्यासविधौ विधेयम् ॥ १ ॥**

व्याख्या भचक्रार्धभवानामशीत्यधिकशतमितानां भागानां स्पष्टतरं द्युज्याफलमुक्तमक्षांशकेभ्यः केन्द्रं व्यासोत्पादनार्थं सुधिया तस्य द्युज्याफलस्यार्धं करणीयम् । एतद्भागाद्यं द्युज्याफलं सौम्यध्रुवादेकांशतः प्रत्यंशं याम्यध्रुवाभिमुखं अशीत्यधिकभागपर्यन्तं ज्ञातव्यम् । एतद्वृत्तवलयोत्पादने दर्शयिष्ये अथ प्रत्यंशराशिषट्कस्य द्युज्याफलकोष्ठकाः सान्तरा लिख्यन्ते

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १ | २ | ३ | ४ | ५ | ६ | ७ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ० १० | ० २० | ० ३० | ० ४१ | ० ५२ | १ २ | १ १२ |
| अन्तरम् | ० १० | ० १० | ० ११ | ० ११ | ० १० | ० १० | ० १० |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ८ | ९ | १० | ११ | १२ | १३ | १४ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | १ २२ | १ ३३ | १ ४३ | १ ५४ | २ ४ | २ १४ | २ २[illegible] |
| अन्तरम् | ० ११ | ० १० | ० ११ | ० १० | ० १० | ० ११ | ० १० |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १५ | १६ | १७ | १८ | १९ | २० | २१ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | २ २५ | २ ४६ | २ ५६ | ३ ७ | ३ १७ | ३ २८ | ३ ३८ |
| अन्तरम् | ० ११ | ० १० | ० ११ | ० १० | ० ११ | ० १० | ० ११ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | २२ | २३ | २४ | २५ | २६ | २७ | २८ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ३ ४९ | ४ ० | ४ १० | ४ २१ | ४ ३२ | ४ ४३ | ४ ५४ |
| अन्तरम् | ० ११ | ० १० | ० ११ | ० ११ | ० ११ | ० ११ | ० ११ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | २९ | ३० | ३१ | ३२ | ३३ | ३४ | ३५ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ५ ५ | ५ १६ | ५ २७ | ५ ३८ | ५ ४९ | ६ ० | ६ १२ |
| अन्तरम् | ० ११ | ० ११ | ० ११ | ० ११ | ० ११ | ० १२ | ० ११ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ३६ | ३७ | ३८ | ३९ | ४० | ४ | ४२ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ६ २३ | ६ ३४ | ६ ४६ | ६ ५७ | ७ ९ | ७ २१ | ७ ३३ |
| अन्तरम् | ० ११ | ० १२ | ० ११ | ० १२ | ० १२ | ० १२ | ० ११ |

## द्युज्याखण्डज्ञानार्थं सारणी।

| भागाः | ४३ | ४४ | ४५ | ४६ | ४७ | ४८ | ४९ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ७<br>४४ | ७<br>५६ | ८<br>८ | ८<br>२० | ८<br>३२ | ८<br>४४ | ८<br>५७ |
| अन्तरम् | ०<br>१२ | ०<br>१२ | ०<br>१२ | ०<br>१२ | ०<br>१२ | ०<br>१२ | ०<br>१३ |

## द्युज्याखण्डज्ञानार्थं सारणी।

| भागाः | ५० | ५१ | ५२ | ५३ | ५४ | ५५ | ५६ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ९<br>१० | ९<br>२२ | ९<br>३५ | ९<br>४८ | १०<br>१ | १०<br>१४ | १०<br>२७ |
| अन्तरम् | ०<br>१३ | ०<br>१३ | ०<br>१३ | ०<br>१३ | ०<br>१३ | ०<br>१३ | ०<br>१३ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ५७ | ५८ | ५९ | ६० | ६१ | ६२ | ६३ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | १० ४० | १० ५३ | ११ ६ | ११ २० | ११ ३४ | ११ ४८ | १२ २ |
| अन्तरम् | ० १३ | ० १३ | ० १४ | ० १४ | ० १४ | ० १४ | ० १४ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ६४ | ६५ | ६६ | ६७ | ६८ | ६९ | ७० |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | १२ १६ | १२ ३१ | १२ ४६ | १३ १ | १३ १६ | १३ ३१ | १३ ४६ |
| अन्तरम् | ० १५ | ० १५ | ० १५ | ० १५ | ० १५ | ० १५ | ० १५ |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ७१ | ७२ | ७३ | ७४ | ७५ | ७६ | ७७ |
|---|---|---|---|---|---|---|---|
| द्युज्याफलं | १४ १ | १४ २६ | १४ ३२ | १४ ४८ | १५ ४ | १५ २१ | १५ ३८ |
| अन्तरम् | ० १५ | ० १६ | ० १६ | ० १६ | ० १७ | ० १७ | ० १७ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ७८ | ७९ | ८० | ८१ | ८२ | ८३ | ८४ |
|---|---|---|---|---|---|---|---|
| द्युज्याफलं | १५ ५५ | १६ १२ | १६ २९ | १६ ४६ | १७ ४ | १७ २२ | १७ ४१ |
| अन्तरम् | ० १७ | ० १७ | ० १७ | ० १८ | ० १८ | ० १९ | ० १९ |

For Private And Personal Use Only

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ८५ | ८६ | ८७ | ८८ | ८९ | ९० | ९१ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | १८<br>० | १८<br>१९ | १८<br>३९ | १८<br>५९ | १९<br>१९ | १९<br>३९ | २०<br>० |
| अन्तरम् | ०<br>१९ | ०<br>२० | ०<br>२० | ०<br>२० | ०<br>२० | ०<br>२१ | ०<br>२१ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ९२ | ९३ | ९४ | ९५ | ९६ | ९७ | ९८ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | २०<br>२१ | २०<br>४२ | २१<br>४ | २१<br>२६ | २१<br>४९ | २२<br>१२ | २२<br>३६ |
| अन्तरम् | ०<br>२१ | ०<br>२२ | ०<br>२२ | ०<br>२३ | ०<br>२३ | ०<br>२३ | ०<br>२४ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | ९९ | १०० | १०१ | १०२ | १०३ | १०४ | १०५ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | २३<br>० | २३<br>२५ | २३<br>५० | २४<br>१६ | २४<br>४३ | २५<br>१० | २५<br>३७ |
| अन्तरम् | ०<br>२४ | ०<br>२५ | ०<br>२६ | ०<br>२६ | ०<br>२७ | ०<br>२७ | ०<br>२८ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १०६ | १०७ | १०८ | १०९ | ११० | १११ | ११२ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | २६<br>५ | २६<br>३४ | २७<br>३ | २७<br>३३ | २८<br>३ | २८<br>३४ | २९<br>७ |
| अन्तरम् | ०<br>२९ | ०<br>२९ | ०<br>३० | ०<br>३० | ०<br>३१ | ०<br>३३ | ०<br>३४ |

## द्युज्याखण्डज्ञानार्थं सारणी।

| भागाः | ११३ | ११४ | ११५ | ११६ | ११७ | ११८ | ११९ |
|---|---|---|---|---|---|---|---|
| द्युज्याफलं | २९<br>४१ | ३०<br>१५ | ३०<br>५० | ३१<br>२७ | ३२<br>४ | ३२<br>४२ | ३३<br>२१ |
| अन्तरम् | ०<br>३४ | ०<br>३५ | ०<br>३७ | ०<br>३७ | ०<br>३८ | ०<br>३९ | ०<br>४१ |

## द्युज्याखण्डज्ञानार्थं सारणी।

| भागाः | १२० | १२१ | १२२ | १२३ | १२४ | १२५ | १२६ |
|---|---|---|---|---|---|---|---|
| द्युज्याफलं | ३४<br>२ | ३४<br>४४ | ३५<br>२७ | ३६<br>११ | ३६<br>५७ | ३७<br>४५ | ३८<br>३४ |
| अन्तरम् | ०<br>४२ | ०<br>४३ | ०<br>४४ | ०<br>४६ | ०<br>४८ | ०<br>४९ | ०<br>५१ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १२७ | १२८ | १२९ | १३० | १३१ | १३२ | १३३ |
|---|---|---|---|---|---|---|---|
| द्युज्याफलं | ३९<br>२५ | ४०<br>१७ | ४१<br>११ | ४२<br>८ | ४३<br>५ | ४४<br>८ | ४५<br>१२ |
| अन्तरम् | ०<br>५२ | ०<br>५४ | ०<br>५७ | ०<br>५७ | ०<br>३ | १<br>४ | १<br>६ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १३४ | १३५ | १३६ | १३७ | १३८ | १३९ | १४० |
|---|---|---|---|---|---|---|---|
| द्युज्याफलं | ४६<br>१८ | ४७<br>२६ | ४८<br>३८ | ४९<br>५३ | ५१<br>११ | ५२<br>३३ | ५३<br>५९ |
| अन्तरम् | १<br>८ | १<br>१२ | १<br>१५ | १<br>१८ | १<br>२२ | १<br>२६ | १<br>२९ |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १४१ | १४२ | १४३ | १४४ | १४५ | १४६ | १४७ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ५५ २८ | ५७ २ | ५८ ४४ | ६० २८ | ६२ १९ | ६४ १७ | ६६ २० |
| अन्तरम् | १ ३४ | १ ४२ | १ ४४ | १ ५[illegible] | १ ५८ | २ ३ | २ १२ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १४८ | १४९ | १५० | १५१ | १५२ | १५३ | १५४ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ६८ ३२ | ७० ५० | ७३ २० | ७५ ५९ | ७८ ४९ | ८१ ५१ | ८५ ७ |
| अन्तरम् | २ १८ | ३० | २ ३९ | २ ५० | ३ २ | ३ १६ | ३ ३१ |

For Private And Personal Use Only

## द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १५५ | १५६ | १५७ | १५८ | १५९ | १६० | १६१ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | ८८<br>३९ | ९२<br>२७ | ९६<br>३५ | १०१<br>६ | १०५<br>५७ | १११<br>२७ | ११७<br>२६ |
| अन्तरम् | ३<br>४९ | ४<br>८ | ४<br>३१ | ४<br>५१ | ५<br>३० | ५<br>५९ | ६<br>२८ |

## द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १६२ | १६३ | १६४ | १६५ | १६६ | १६७ | १६८ |
|---|---|---|---|---|---|---|---|
| द्युज्या-फलं | १२४<br>४ | १३१<br>२९ | १३९<br>५० | १४९<br>१५ | १६०<br>२ | १७२<br>२८ | १८६<br>५८ |
| अन्तरम् | ७<br>२५ | ८<br>२१ | ९<br>२५ | १०<br>४७ | १२<br>२६ | १४<br>३० | १७<br>५ |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १६९ | १७० | १७१ | १७२ | १७३ | १७४ |
|---|---|---|---|---|---|---|
| द्युज्या-फलं | २०४<br>३ | २२४<br>४० | २४९<br>४२ | २८१<br>१ | ३२१<br>२९ | ३७२<br>२ |
| अन्तरम् | २०<br>३७ | २५<br>२ | ३१<br>१९ | ४०<br>२८ | ५०<br>३३ | ७८<br>० |

द्युज्याखण्डज्ञानार्थं सारणी ।

| भागाः | १७५ | १७६ | १७७ | १७८ | १७९ | १८० |
|---|---|---|---|---|---|---|
| द्युज्या-फलं | ४५०<br>२ | ५६२<br>३१ | ७५०<br>० | ११२५<br>५ | २२५०<br>४ | ३४८०<br>० |
| अन्तरम् | ११२<br>२९ | १८७<br>२९ | ३७४<br>५ | ११२४<br>५९ | १२२९<br>५६ | ०<br>० |

अथ द्युज्याफलानयनम् ।

**भवेल्लवाधः कलिकादिकं यत्**
**तत् खण्डयोरन्तरसंगुणं सत् ।**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षष्ट्या हृतं भुक्तफले नियोज्यं
भवन्त्यहर्ज्यांशकलानि सम्यक् ॥ १३ ॥

व्याख्या लवानामधस्ताद्यदि कलादिकं भवति तदा भुक्तभोग्ययोर्द्वयो: खण्डयोरन्तरेण गुणं षष्ठ्या हृतं लब्धं भुक्तफले योज्यं एवं द्युज्यांशकलानि सम्यक् भवन्ति। अत्रोदाहरणम्। कल्पनया यथा लवा: १ तदध: कलास्त्रिंशत् ३० ततो द्युज्याफलकोष्ठकेषु प्रथमांशाध: प्राप्तं द्युज्याफलं ०।१० तदग्रेऽन्तरं ०।१० अनेनान्तरेणाध:स्था: कला: त्रिंशद्गुणिता: ३०० अस्याङ्कस्य षष्ठ्या भागे लब्धा ५ उपरि शून्यस्यापि-तास्तेषां भागे प्राप्ता: पञ्चैव कला: स्थितास्ता भुक्तफलमध्ये निक्षिप्ता जाता पञ्चदश १५ एतत् सार्द्धांशस्य द्युज्याफलं ०।१५ एवमन्यत्रापि कार्यम्।

अथ सौम्ययाम्ये इष्टाद्यांशानामुन्नतनलयव्यासप्रमाणानयनम्।

* पलैर्विहीना गगनाष्टरूपा: १८०
शेषास्तथाक्षा: पृथगेव धार्य्या:।
शेषाक्षयोर्वासरखण्डकेभ्यो
द्युज्याफलं वै परिसाधनीयम् ॥ १२ ॥

* अत्रोपपत्तिरस्य ग्रन्थस्य समाप्तौ मदुक्तेन प्रतिभासोधकेन छेद्यकविधिना बोध्या।

For Private And Personal Use Only

तदक्षसंज्ञेन फलेनहीनं
युक्तं च शेषांशफलं विधाय ।
अर्द्धं विधेयं च ततः क्रमेण
केन्द्रं भवेद्व्यासदलं भुजाख्ये ॥ १३ ॥
शेषे तथाक्षे च यथेप्सितांशाः
शोध्यास्ततः पूर्ववदुक्तरीत्या ।
कार्याणि केन्द्राणि सविस्तराणि
भुजाख्यवृत्तात्पुरतः स्फुटानि ॥ १४ ॥

एषां व्याख्या पलशब्देन अक्षांशा उच्यन्ते पलैः स्वस्वदेशाक्षांशैर्गगनाष्टरूपा अशीत्यधिकशतांशा १८० हीनाः कर्त्तव्याः शेषांशाः अक्षांशाश्च पृथक् धार्य्याः । ततोऽक्षशेषाक्षांशयोर्द्युज्याखण्डकेभ्यः पूर्ववत् द्युज्याफलमानीयाक्षांशगतफलेन अक्षशेषफले द्विस्थं एकत्र हीनमपरत्र युतं च कृत्वा द्वयमध्यर्द्धीकृतं सत् क्रमेण केन्द्रव्यासौ भुजवृत्तस्य भवतः । तदनु अक्षशेषे अक्षे च एकादिषट्पर्य्यन्तेषु इष्टोन्नतांशेषु अक्षशेषात् अक्षाच्च पूर्वोक्तरीत्या एव तावतामुन्नतांशानां भुजाग्रस्थितानां केन्द्रव्यासानयनं कार्य्यम् । अत्रोदाहरणम् । यथा श्रीमद्योगिनीपुरे याम्याक्षांशाः २८।३९ एतेऽक्षांशा अशीत्यधिकशत १८० मध्ये पात्यन्ते शेषांशाः १५१।२१ एभ्यो द्युज्याफलमा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीयते यथा राशिषट्कस्य स्वाहोरात्रप्रमाणफलज्याकोष्ठकेषु एकपञ्चाशच्छताध: प्राप्तं द्युज्याफलं ७५।५८ तदूर्घ्वोऽन्तरं २।५० अनेनान्तरेणांशाध:स्थिता: कला: २१ गुण्यन्ते जाता: ४२। १०५० अधस्तनाङ्कस्य षष्ट्या भागे लब्धा: १७ एते उपरितनाङ्के ४२ मध्ये योज्यन्ते जाता ५८ एतद्द्युज्याफलाङ्क ७५। ५८ मध्ये योज्यते जातमत्रशेषस्य द्युज्याखण्डफलं भागाद्यं ७६। ५८ अनयैव रीत्या अत्रांशेभ्य: २८। ३८ द्युज्याफलं प्रसाध्य तदिदमत्रांशफलं भागाद्यं ५।१ तदनुपूर्वानीतं शेषांशफलं स्थानद्वये संस्थाप्यात्रांशफलमेकत्र पातयित्वा अन्यत्र योजयित्वा चावशिष्टांशेऽर्ङ्कीकृते क्रमेण भुजङ्गतस्य केन्द्रं ३५।५८।२० व्यासश्च ४०।५८।२० स्याताम्। अथ भुजङ्गतादग्रे स्थितानामुन्नतांशानां केन्द्रव्यासानयनम्। पूर्वोक्ताद्‌त्रशेषात् १५१।२१ षडुन्नतांशा: पात्यन्ते जाता: १४५।२१ तथात्रांशा: २२।३८ तत: पूर्वरीत्या षडुन्नतांशानां केन्द्रे २८।३१ व्यास: ३३।२८ एवं क्रियमाणे चतुर्विंशत्युन्नतांशानां पातनाच्छेषांशा: १२७।२१ अत्रांशा: ४।३८ एभ्य: पूर्वरीत्या साधितं केन्द्रं १८।२७ व्यास: २०।१५

यत्रात्रांशेभ्य उन्नतांशा न पतन्ति तत्र युक्तिमाह।

**स्युरक्षतश्चेदधिकोन्नतांशा:**

**तेभ्योऽक्षपाते विहिते तथैव।**

For Private And Personal Use Only

द्युज्याफले तद्द्वयतः प्रसाध्ये
युक्तोनितं शेषभवेऽग्रजातम् ॥ १५ ॥
अर्द्धीकृतं केन्द्रमिहेति तद्वद्
व्यासोऽपि तस्मात्पुरतोऽग्रकानाम् ।
शेषे तथाद्ये च वियोगयोगा-
त्तथैव केन्द्राणि सविस्तराणि ॥ १६ ॥

अनयोर्व्याख्या यत्राग्रांशेभ्यः उन्नतांशा न पतन्ति तत्रोन्नतांशेभ्योऽग्रांशान् पातयित्वा शेषांशेभ्य उन्नतांशान्पातयित्वा ततः प्राग्वत्तयोर्द्युज्याफले समानीय द्विस्थे शेषांशफले अग्रद्युज्याफलेन क्रमाद्युक्तोनिते च पश्चादर्द्धीकृते तावतामुन्नतांशानां क्रमेण केन्द्रव्यासौ भवतः । तत ऊर्ध्वमीप्सितांशानां शेषांशेभ्यः पातेऽग्रांशकेषु चैवं कृते च द्युज्याफलादिप्रक्रियायां कृतायां क्रमेण नवत्युन्नतांशानां केन्द्राणि व्यासाश्च भवन्ति । अत्रोदाहरणम् । यथा पूर्वोक्ताः शेषांशाः १२७।२१ अग्रांशाः ४'३८ अथ शेषांशेभ्यः षडुन्नतांशाः शोध्यन्ते जाताः शेषांशाः १२१।२१ उन्नतांशानां बहुत्वात् अग्रांशेभ्यो न पतन्ति इत्यग्रांशा एव तेभ्यः पात्यन्ते शेषाः १।२१ एतेऽग्रांशाः एवं एषां द्युज्याफलं यथा शेषाणां द्युज्याफलं ३४।५८। अग्रांशद्युज्याफलं ०'१२ ततो द्विस्थे शेषद्युज्याफले अग्रांशद्युज्याफलेन युक्ते वियुक्ते अर्द्धीकृते च षडुन्नतांशानां केन्द्रं

१७।३६ व्य.सः १८।२३ ततः परमीप्सितांशान् शेषांशेभ्यो विशोध्य भचांशेषु क्षिप्त्वा पूर्वोक्तद्युज्याफलादिप्रक्रियया नवत्युन्नतांशपर्य्यन्तं केन्द्रव्यासाः साध्यन्ते ।

अथ याम्ययन्त्रे इष्टांशानां उन्नतवलयकेन्द्रव्यासानयनम् ।

यन्त्रेऽथ सौम्ये यमदिग्गतेऽपि
भुजाख्यवृत्तं भवतीह तुल्यम् ।
अत्रापि सौम्योदितयैव रीत्या
कार्य्यो विशेषः पुनरग्रतोऽस्मात् ॥ १७ ॥
शेषे तथांशे च समीप्सितांशाः
क्षेप्या भचक्रार्द्धमुपैति यावत् ।
भार्द्धाधिकं यत्र हि चांशशेषं
तच्छोधितं शून्यरसानलेभ्यः ३६० ॥ १८ ॥
अत्रांशकान् प्राप्तफलेन युक्तं
हीनं तदर्द्धं भवति द्वयं तत् ।
अतोऽंशशेषे पतिते भचक्रात्
शेषे तथांशे च यथेष्टभागान् ॥ १९ ॥
त्यक्त्वा च धृत्वा च कृते तथैव
सर्वाणि केन्द्राणि सविस्तराणि ।

**सौम्यानि याम्यानि च मिश्रयन्त्रे**
**निवेशनीयानि यथोदितानि ॥ २० ॥**

एषां व्याख्या सौम्ये याम्ये च यन्त्रे भक्रांशेभ्यो भुजवृत्तानयनं तुल्यमेव ततोऽत्रापि याम्ययन्त्रे सौम्ययन्त्रोक्तयैव प्रक्रियया भुजवृत्तस्य केन्द्रव्यासौ साध्यौ । अथत: केन्द्रव्यासानयनेऽस्मात्सौम्ययन्त्रादयं विशेष: । कोऽयमित्याह । शेषांशे क्रांशेऽच एकादिषट्पर्यन्ता इष्टोन्नतांशा भचक्रार्धेमशीत्यधिकशतांशान् यावत्क्रमेण योजनीया: ततो द्युज्याफलाद्यानयनं सौम्ययन्त्रवत् । भचक्रादूर्ध्वं पुन: शून्यरसानलेभ्य: ३६० अचशेषे विशोधिते प्राग्वदुभयोर्द्युज्याफले साधिते द्विस्थे शेषफले अचफलेन युक्ते वियुक्ते अर्धीकृते च तावतामुन्नतांशानां केन्द्रव्यासौ स्याताम् । तदनु शून्यरसानलेभ्य: प्रकृशोधितेऽचशेषे इष्टोन्नतांशान्पातयित्वा अचांशे तान्योजयित्वा च शेषे तथैव कृते नवत्यंशपर्यन्तं सर्वे केन्द्रव्यासा भवेयु: । एतानि च सौम्यानि याम्यानि सव्यासानि केन्द्राणि सौम्ययाम्यात्मके मिश्रयन्त्रे बुद्ध्या स्थाप्यानि । अत्रोदाहरणम् । अचांशा: २८।३९ शेषांशा १५१।२१ एभ्य: प्राग्वत्साधितं भुजवृत्तस्य केन्द्रं २५।५८।३० व्यास: ४०।५९।३० ततोऽचशेषेऽद्वे च १५१।२१।२८।३९ षडुन्नतांशा योज्यन्ते जाता: १५७।२१ अचांशा: ३४।३९ एभ्य: प्राग्वत् षडुन्नतांशानां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केन्द्रं ४६।१ व्यास: ५२।९ एवं चक्रार्द्धं यावत् केन्द्रव्यासा: साध्या: एवं क्रियमाणे भचक्रादूर्द्ध्वं शेषांशा: १८१।२१ भचांशा: ५८।३९ अत्र भार्द्धाधिकत्वाच्छेषांशा: १८१।२१ भचक्रात् शोध्यन्ते जाता: १७८।३९ एते शेषांशा: उभयो: प्राग्वद्‌द्युज्याफले साधिते शेषफले द्विस्थानस्थेऽल्पफलेन एकत्र युक्ते अन्यत्र वियुक्ते च अर्द्धीकृते जातं त्रिंशदुन्नतांशानां केन्द्रं ९३।४० व्यास: ९२।२९ यथा यथा शेषादुन्नतांशा हीना: क्रियन्तेऽत्रे क्षिप्यन्ते च तथा जाता: शेषांशा: १७२।३९ भचांशा: ६४।२९ एभ्य: प्राग्वत् षट्त्रिंशदुन्नतांशानां केन्द्रं १५९।५२ व्यास: १४७।२७ अनयैव रीत्या नवत्यंशपर्य्यन्तं केन्द्रव्यासा: सम्पादनीया: ।

अथ निरक्षांशात् लङ्काप्रदेशाच्मेरुपर्य्यन्तं पूर्वापरदिग्व्यापिन: सप्तविभागास्तदन्तर्वर्त्तिनां नगराणां अचांशज्ञानार्थं आर्य्यै: कल्पिता: सन्ति । तेषां यवनभाषया इकलीम इति संज्ञा: कृता: । शनिगुरुभौमरविशुक्रबुधसोमा: क्रमात् स्वामिनश्च एवं निरक्षलङ्काप्रदेशात् प्रतिभागमचांशास्त्रयोदश नवलिप्ताभि १२।५१ ऊना मध्यरेखात: पूर्वापरभागस्था भवन्ति । एवं यनाचांशा: त्रयोदश १३ षड्विंशति: २६ एकोनचत्वारिंशत् ३९ द्विपञ्चाशत् ५२ पञ्चषष्टि ६५ अष्टसप्तति: ७८ नवति: ९० पर्य्यन्ता: । अनेनैव क्रमेण सप्तभागा: स्यु: परं द्विपञ्चाश ५२ दचांशा यावन्मनुष्याणां निवास:



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदग्रत: षट्षष्ठ्यंशपर्य्यन्तं शीतवाहुल्यात् अन्धकाराच्च मनुष्याणां अल्प एव सञ्चार: तत्परत: किन्नरगन्धर्वविद्याधरसिद्धानां प्रचारदेवभूमय: ।

अथ चतुर्विभागान्तर्वर्तिनां नगराणां सुखावबोधार्थं मध्यांशा: प्रदर्श्यन्ते तद्यथा लङ्कायामक्षांशा: ०।० आदाने ११ काञ्च्यां १२ तिलङ्गे १८ अनागुन्द्यां १८।१० गङ्गासागरे १८।२० द्रावडे १८।३० देवगिरौ २०।३४ त्र्यम्बकसंज्ञाणदमननवसारिकायां २१ अलजपुरे २१ माण्डवे २२ मक्कायां २१ मधुवने २० श्रीभृगुकच्छे नन्दपदे स्तम्भतीर्थे धवलके च २२ आशापल्ल्यां २३ सोमनाथपत्तने माङ्गल्यपुरे २२।२०।१५ रैवतकाचले २२।३१ उज्जयिन्यां २२।३० धारायां २३।२० अणहिलपुरपत्तने २४।० नलपुरे २५।० सिरोजे २५ ग्वालियरे २५ अजमेरे २६ नागपुरे २६ वाराणस्यां २५।२६ लक्ष्मणावत्यां २६ कुण्डिनगरे २६।२८ कान्यकुब्जे २६।३५ माणिक्यपुरे २६।४८ तैरभुक्ते २७ जाजनगरे २७ उड्डीयस्थाने च २७।५ अयोध्यायां २७।२२ गोपालगिरौ २७।२८ बुद्दिजे २७।४५ गोपीमहकोजलाख्यां २८।४ कम्पिलायां २८।१० शिवस्थाने २८।१५ उच्चनगरे २८।२० चरणनगरे २८।२८ दिल्ल्यां श्रीयोगिनीपुरे च २८।३८ रोहीतके २८।० मेरटे २९।० मुलताने २९।४ हास्यां २९।४५ श्रीपेरोजनृपाङ्कितहिंसारपेरोजाबादे २९।४८ चम्पाने २२।२ दीगे २२ खम्भाति २२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भरुंजमहम्मदावादे २३ द्वारकायां २३ जालोरदुर्गे २४ सरस्वतीपत्तने २८।५० थानेस्वरे कुरुक्षेत्रे ३०।०० कपिकुले जलन्धरे सुग्रामसिमथिके ३०।३० देवपालपुरे ३१ बदकसाने ३५ तूसे ३६।२२ दामगाच ३६।३० सीराजे ३६।४० वलखे ३६।४० नपसावरे ३७।१० काश्मीरे ३७।२० तिरमिद ३७।३५ बावरदे ३७।४० चिगानि ३७।५० बुखारे ३९ समरकन्दे ४० बुधारजमे ४२।२० कासगरे ४४ बुलगारे ४९ तावत्पर्य्यन्ता निवासभूमि:। तथा कार्य्ये सति एभ्यो- ऽन्येऽपि विलोक्या:।

अथ गणकानां हिताय कियतामपि नक्षत्राणां सौम्य- याम्यकेन्द्रव्यासा: सान्तरा: परमदिनविषुवच्छायास्तत्कर्ण- सहिता: प्रदर्श्यन्ते यथा मवीनयाम्यसौम्यमिश्रयन्त्रकरण एभ्य: सत्वरमायाति परमदिनं काश्यां ३४।५ पलच्छाया ५।४५ कर्ण: १३।१८॥

पश्चात् यन्त्रे भमण्डलार्थं पश्यनिष्पत्तिवर्षोत्पन्नसायन शाश्चिंशदक्षध्रुवका: सौम्ययाम्यविक्षेपसहिता: प्रोच्यन्ते।

खिष्ण्यं क्रियंशा ऋतवोऽग्निवेदा: ६।४३
सौम्य: शरो भानि लवास्तथा २७ स्मिन्।
नवान्तकं नन्दधरास्त्रिवेदा- १९।४३
बाणोऽस्य याम्योऽग्निशराश्च सार्द्धा:५३।३०॥२१॥

For Private And Personal Use Only

| उन्नतांशाः | ० | ६ | १२ | १८ | २४ | ३० | ३६ | ४२ | ४८ | ५४ | ६० | ६६ | ७२ | ७८ | ८४ | ९० |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| भुजांश-शेषांशाः | २५<br>३६ | १९<br>३६ | १२<br>३६ | ७<br>३६ | १<br>३६ | ५<br>२४ | १०<br>२४ | १६<br>२४ | २२<br>२४ | २८<br>२४ | ३४<br>२४ | ४०<br>२४ | ४६<br>२४ | ५२<br>२४ | ५८<br>२४ | ६४<br>२४ |
| शेषशेषांशाः | १५४<br>२४ | १४८<br>२४ | १४२<br>२४ | १३६<br>२४ | १३०<br>२४ | १२४<br>२४ | ११८<br>२४ | ११२<br>२४ | १०६<br>२४ | १००<br>२४ | ९४<br>२४ | ८८<br>२४ | ८२<br>२४ | ७६<br>२४ | ७०<br>२४ | ६४<br>२४ |
| सौम्य-केन्द्राणि | ४१<br>२ | ३२<br>२६ | २७<br>४१ | २३<br>५५ | २१<br>७ | १९<br>० | १७<br>२२ | १६<br>५ | १५<br>५ | १४<br>१६ | १३<br>२५ | १२<br>२१ | १२<br>२० | १२<br>३४ | १२<br>२५ | १२<br>२२ |
| व्यासाः | ५५<br>२८ | ३६<br>२६ | ३०<br>२ | २५<br>१३ | २१<br>२४ | १८<br>१५ | १५<br>३५ | १३<br>१५ | ११<br>१२ | ९<br>१८ | ७<br>२२ | ५<br>४५ | ४<br>११ | २<br>५२ | १<br>२७ | ०<br>० |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रैव नेत्रद्वयमग्निवेदा- २२।४३
सौम्यः शरस्तर्कभुजा नखाश्च २६।२०।
तत्राश्विभं बाणकराः कुदोषौ २५।२१
बाणोऽस्य सौम्यो मुनयो नखाश्च ७।२०॥२२॥
अजे भमङ्कद्वितयं त्रिवेदाः ०।२६।४३
सौम्यः शरश्चन्द्रशराः खबाहू ५१।२० ।
मनुष्यशीर्षं धृतयः सुराः स्युः १।१८।३३
सौम्योऽस्य *पञ्च त्रिकराः खमेव २३।०॥२३॥
वृषेऽपरं रामहशोऽग्निवेदाः १।२३।४३
सौम्येषुरस्याभ्रगुणा वियच्च ३०।०।
ब्राह्मं नृभे भूस्त्रिदिवौकसोऽ २।१।३३ स्य
बाणस्तु याम्यो विशिखा दिशश्च ५।१०॥२४॥
नृयुग्मपादे करिणस्त्रिवेदा २।८।४३
याम्यः शरोऽस्येन्दुगुणाश्च सार्द्धाः ३१।३०।
स्कन्धोऽस्य वामो रवयोऽग्निबाणाः २।१२।५३
शरोऽस्य याम्योऽद्रिधराः खरामाः १७।३०॥२५॥
तस्मिन् षडास्योऽग्निधरास्त्रिबाणा २।१३।५३

* पञ्च शरः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाणोऽस्य याम्यो द्विकराश्च सार्द्धाः २२।३०।
तद्वत्तभे शून्यभुजा २० स्त्रिबाता- ५३
याम्योऽस्य पश्ची नगभूमयः १७ ० खम् ॥२६॥
कर्के च धिष्ण्यं भगवानगस्तिः
षडब्धयो ३।६।४ याम्यशरोऽक्षशैलाः ७५।
तत्रैव चार्द्रा ऋतवः सुराश्च ३।६।३३-
वाणोऽस्य याम्योऽङ्कगुणा दिशश्च ३९।१०॥२७॥
तस्मिंस्तृतीयं रवयी गुणाश्चा ३।१२।१३
सौम्यः शरो नन्दखवाः खवेदाः ९।४०।
व्याधानुजोऽस्मिन्धृतयो ऽग्निवेदा ३।१८।४३
याम्यः शरो भूपतयो दिशश्च १६।१०॥२८॥
सिंहे मघा भूमिकरास्त्रिबाह्वः ४।२१।२३
सौम्यः पतङ्गस्य नभः खचन्द्राः ०।१०।
कन्यास्थितं भन्त्रिधरास्त्रिदोषः ५।१३।२३
सौम्योऽस्य वाणो गिरिशः खबाणाः११।५०॥२९॥
भन्तच्च ऋक्षाणि सुराः ५।२७।३३ शरोऽस्य
याम्यः पयोराशिभुवोऽब्धबाता १४।५०।
चित्रा तुलायां तिथयोऽग्निरामा ६।१५।३३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याम्यः शरोऽस्य द्वितयं लवाः खम् २।०॥३०॥
स्वाती च तस्यां तिथयोऽग्निबाणा ६।१५।५३
सौम्यः शरो भूमिगुणाः खरामाः ३१।३०।
कोटे विशाखा दहनस्त्रिरामा ७।३।३३
सौम्यश्शरोऽब्धिश्रुतयश्च सार्द्धाः ४४।३०॥३१॥
ज्येष्ठाथ चापे धरणी सुराश्च ८।१।३३
स्याद्दक्षिणस्यां विशिखोऽब्धयः खम् ४।०।
तस्मिन् धनुः कोटिभमग्निभूमि-
स्त्र्यम्भोऽब्धयः ८।१३।४३ षट्कृतिरुत्तरेषु ३६।०॥३२॥
मूलं च तत्रैव नखा गुणाः स्यु- ८।२०।३
र्याम्योऽस्य बाणोऽग्निधराः खचन्द्राः १३।१०॥
भं तत्र तत्त्वानि समुद्ररामाः ८।२५।३४
सौम्यः पतत्यस्य करौ खवाताः २।५०॥३३॥
मृगेऽभिजिद्गं षडुषर्बुधघ्नाः ९।६।१३
सौम्यः शरो बाहुरसा नभश्च ६२।०।
श्रुतिर्मृगे बाहुकरास्त्रिवेदाः ९।२२।४३
सौम्यः शरो नन्दकरा दिशश्च २९।१०॥३४॥
कुम्भेऽथ भं बाणकरास्त्रिबाणाः १०।२५।५३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौम्यः शरो रामकरा वियच्च २३।०।
तत्रैव भं नागभुजास्त्रयोऽपि१०।२८।३
सौम्यः शरः शून्यरसाः खमेव ६०।०॥३५॥
मीने हरांशः कुकरास्त्रयोऽथ ११।२१।३
सौम्यः शरो भूमिगुणा नभोऽत्र ३१।०।
तत्रैव भं वह्नियमास्त्रिधाऽग्यो ११।२३।१३
याम्यः शरो नन्दलवाः खवेदाः ९।४०॥३६॥
इमानि भान्यायनकर्मशुद्धा-
न्येषु द्विबाणा ५२ विकला अपि स्युः ।
यन्त्रोपयोगीनि मयोदितानि
नक्षत्रगोले बहुलानि तानि ॥३७॥
नक्षत्रगोले त्वनयैव रीत्या
रहस्यमेतद्यवनागमस्य ।
दृक्कर्मशुद्धानि विधाय भानि
यन्त्रे निवेश्यानि गुरूपदेशात् ॥ ३८ ॥

एषां व्याख्या शकमतेन नक्षत्रगोले नक्षत्राणां द्वाविंश-त्यधिकसहस्र १०२२ मुक्तमस्ति तन्मध्ये ग्रन्थकारेण यावनं नक्षत्रगोलं सविस्तरं सम्यग्बुद्ध्वात्र यन्त्रोपयोगीनि द्वात्रिं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नक्षत्राणि गृहीतानि तत्र मेषे ५ वृषे २ मिथुने ५ कर्के ४ सिंहे १ कन्यायां २ तुलायां २ वृश्चिके ६ धनुषि ४ मकरे २ कुम्भे २ मीने २ एषां ग्रन्थादिध्रुवकाङ्का: सायनाः सविक्षेपाः स्पष्टार्था एव यथा मेषे प्रथमनक्षत्रस्य राश्यादि-ध्रुवकः ०।६।४३।५२ उत्तरो विक्षेपः २७।० नक्षत्राणां मेषा-दिराश्यंशाद्याः क्रमेण नक्षत्रध्रुवको मेषादिराशिभ्यो या-म्यसौम्यविभागेन नक्षत्राणामन्तरं विक्षेपः। तथा सर्वेषु ध्रु-वकेषु लिपच्छ्राद्यहिकला ज्ञेयाः नक्षत्रनामादिन्यासो नक्ष-त्रकोष्ठकेभ्योऽवधार्यः। एतानि नक्षत्राणि दृक्कर्मशुद्धानि कृत्वा गुरूपदेशाद्यन्त्रेषु स्थाप्यानि दृक्कर्मणां पुरस्तात् व्याख्यास्यते नक्षत्रगोले पुनर्दृक्कर्मनक्षत्राणि दृक्कर्मशुद्धानि रहितानि स्थाप्यानीति शेषः।

अथ ग्रन्थादिनक्षत्रध्रुवकेभ्योऽभीष्टवर्षे नक्षत्रध्रुवकानयनमाह।

> दिनन्दसूर्यैं १२९२ रहिताच्छकाब्दा-
> न्नभोऽश्विशैलै ७२० र्गुणितात्खखेभैः ८००।
> आप्तं कलाद्येन युतं त्वभीष्टे
> वर्षे भवेत्सायननामकन्त्तत् ॥ ३९ ॥

व्याख्या इष्टवर्षस्य शकाब्दे दिनन्दसूर्यानूनयित्वा शेषं न-भोऽश्विशैलैर्गुणयित्वा खखेभैर्भाज्यास्तेभ्यो लब्धं यत्कलादिफलं तद्युताः सायना ग्रन्थादिनक्षत्रध्रुवकाः इष्टवर्षस्य नक्षत्रध्रु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वका भवन्ति। अथ गम्यशकवर्षे १२८२ मित्यन्नः एषु यातितेषु शाके न किञ्चित्तिष्ठति ततः कल्पनया शाकः १३०४ वर्षे नक्षत्रध्रुवकोदाहरणं प्रदर्श्यते। स्थापितशके १३०४ एभ्यो द्विनन्दसूर्याः १२८२ पात्यन्ते शेषं १२ खाश्विशैले ७२० संगुण्य जातं ८६४० अष्टशत्या ८०० भागे लब्धं कलाः १०।४८ एताः पूर्वोक्तसायने मेषाद्ये नक्षत्रध्रुवके०।६।४ ३।५२ क्षिप्यन्ते जातोऽभीष्टशकवर्षस्य नक्षत्रध्रुवकोऽयम् ०।६।५४।४० एवं शेषा अपि अश्व्यादिनक्षत्रध्रुवकाः स्वयमूह्याः

अथ नक्षत्राणां स्वस्वध्रुवकेभ्यः स्वकीयस्वकीयक्रान्त्यानयनम्।

**मेषादावुत्तरो गोलस्तुलादौ दक्षिणः स्मृतः। क्रान्तौ**
**चिराश्वियुक् दोर्ज्या वाणकोटिज्ययाहत॥ ४० ॥**

**भाज्याऽन्त्यया ततश्चापे नवतेः शोधिते पुनः।**
**गुणेन भक्ता बाणज्या प्राप्तं भागादिकं ततः॥ ४१॥**

**स्यादन्तरं पराक्रान्तिस्तेन युक्ता तथोनिता।**
**गोले भवाणयोरैक्ये भेदे वा स्फुतो गुणः॥४२॥**

**हतः पूर्वं धनुर्मौर्व्या भक्तश्चान्त्यज्यया ततश्च**
**लब्धाच्चापं युतं हीनं कर्णव्यंरेण तत्॥४३॥**

**गोले भपक्षिणोरैक्ये भेदे स्यादपमः स्फुटः।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याम्यसौम्यविभागेन मध्यरेखासमाश्रित: ॥४४॥

एषां व्याख्या ग्रन्थादिनक्षत्रध्रुवके मेषादिराशिषट्के उत्तरगोलस्तुलादिराशिषट्कस्थे दक्षिणगोल:। ततो नक्षत्रध्रुवकं पट्टके संस्थाप्य तत्र राशिस्थाने राशित्रयं दत्त्वा पूर्ववज्जीवा समानीयते सा भुजज्या सत्रिराशिज्या च कथ्यते सा बाणकोटिज्यया हत्वा पाक्यज्यया ३६०० भाज्या तत: प्राप्तचापमानीय नवतेर्विशोध्य तच्छेषादुत्पन्नेन गुणेन नक्षत्रशरज्यायां भक्तायां ततो लब्धं भागादिकमन्तरमुच्यते तत: पूर्वोक्तग्रन्थादिनक्षत्रध्रुवके तदध:स्थितबाणेन सह एकदिक्स्थितत्वादैक्ये भिन्नदिक्स्थितत्वात्तयोर्भेदे च प्रागानीतेनान्तरेण परमक्रान्तिभागा: २३।३५ क्रमेण युक्तहीनाश्च क्रियन्ते ततस्तेषां जीवामानीय पूर्वानीतचापस्थानीयतया जीवया सा संगुण्यात्यज्यया ३६०० विभज्य यल्लब्धं सापक्रमज्या ततो लब्धाच्चापमानीय प्राग्वद्गोलैक्ये गोलभेदे च नक्षत्रशरेण युक्तं हीनं च कृतं तच्चापमेव मध्यरेखात: सौम्ययाम्यविभागेन नक्षत्राणां स्फुटोऽपम: क्रान्त्यंशानां भवति। अत्रोदाहरणं संवत् १४२७ मेषादिस्थितत्वादुत्तरगोले सायनो रोहिणीनक्षत्रस्य ध्रुवक: २।१।२३।५२ शरोऽस्य याम्य: ५।१० ध्रुवके च २।१।२३।५२ राशित्रयक्षेपे जात: ५।१।२३।५२। अ-थाद्यमितयादविकल्पमित्यादिना भुजज्यानीयते भुजोऽयं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



०।२८।२६।८। ततः क्रमज्याकोष्ठकेषु भुजभागाना २८ मधःप्रासं फलं १६६०।६ तदधोऽन्तरं ५५।१२ अनेनान्तरेण भुजभागानामधःस्थे कलाविकले २६।८ गुणिते षष्ट्या भक्ते लब्धे फले २४।२ पूर्वफले १६९०।६ न युक्ते जाता सा भुजज्या १७१४।८ एवं सर्वत्रापि । अथ कोण्यस्य कोटिज्या तत्र याम्यो रोहिणीशरः ५।१०। अयं नवतेः शुद्धो जातः ८४।५० अतः प्राग्वदानीता जीवा ३५८५।२५ अनया प्रागानीता भुजज्या १७१४।८ गुणिता जाता ६१४५९४२।५८ अस्यास्त्रिज्यया ३६०० भागे लब्धाः १७०७।१२ अत्र कल्पनखेयमेव भौवी । अत्र चापसाधनं यथा क्रमजीवाकोष्ठकानां अष्टाविंशतिभागानामधःस्थं फलं १६९०।६ पूर्वाभिसायाः कला २८।०।० द्विमौर्व्याः १७०७।१२ पात्यन्ते शेषाः १७।६ तेन चापांशाः शून्यमुपलभ्यन्ते शेषाः १७।६ षष्ट्या संगुण्याष्टाविंशत्यधःस्थितेनान्तरेण ५५।१२ विभज्यते लब्धं कलादिफलं १८।३४ जातं जीवातश्चापमिदं २८।१८।३४ एवं सर्वत्रापि चापसाधनं कर्त्तव्यम्। अथ चापे नवतेः शोधिते शेषं भागादि ६१।४१।२६ अतः प्राग्वज्जीवा ३१६९।१० अनया प्राग्वज्जीवायां नक्षत्रशरस्य ५।१० ज्यायां ३२४।१० भक्तायां लब्धं भागादिकमन्तरं ०।६।८ ततस्त्रिराशिविपरहितस्य रोहिणीमध्यभभुजकलास्य २।१।२३।५२ तस्करस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च भिन्नदिक्केन गोलभेदोऽस्तीति तैरान्तरेण ०।६।८ परक्रान्तिभागा २३।२५।० वियोज्यन्ते जाता: २३।२८।५२ अतः प्राग्वद्दोर्ज्या १४२४।२१ यथा प्रागानीतचापकोटिज्यया २१६८।१० गुणिता जाता ४५४५८८६।५।२० अन्त्यज्यया ३६०० भक्ता लब्धापक्रमज्या १२६२।४५ अस्याः प्राग्वच्चापं साधितं २०।३२ एत एव क्रान्तिभागा ज्ञेयाः। अथ राशित्रयवर्जितरोहिणीनक्षत्रध्रुवकस्य तच्छरस्य च भिन्नदिक्केन चापमध्यान्तरेण ५।१० ऽविशिष्टा रोहिणीनक्षत्रस्य सौम्याः क्रान्तिभागाः सिद्धाः १५।२२।६ एतवता रोहिणीनक्षत्रं मध्यरेखातः उत्तरस्यां एतावद्भिर्भागैस्तिष्ठति अनया युक्त्या सर्वेषां नक्षत्राणां क्रान्तिसाधनं कार्यम् ।

अथ प्रकारान्तरेण क्रान्तेरानयनम् ।

अथ वानीय दोःक्रान्तिनक्षत्रध्रुवकात्ततः ।
तया शरस्य संयोगो वियोगो वैक्यभेदतः॥४५॥
तस्माज्जीवा हतोत्क्रष्टक्रान्तिकोटिज्यया थ वा ।
उत्क्रमक्रान्तिकोटिज्याभक्ता प्राप्ताद्धनुश्च यत् ॥४६॥
तदेव क्रान्तिभागाः स्युः सौम्या याम्या यथाविधि ।
क्रान्तिसायकयोर्योगाद्वियोगाच्छेपतश्च दिक् ॥४७॥

एषां व्याख्या अथ वेति प्रकारान्तरे प्राग्वदोलं विचार्य-



For Private And Personal Use Only

नक्षत्रध्रुवकात् भुजमानीय तस्मात्क्रान्तिरानीयते तया क्रान्त्या सह शरस्य दिगैक्ये योगो दिग्भेदे वियोगश्च क्रियते तस्मा-द्युज्यादियुक्तात् प्राग्वज्ज्यामानीय परमक्रान्तिकोटि-ज्यया तां संगुण्य त्रिभाजीतक्रान्तेः कोटिज्यामुत्पाद्य तया-सा भज्यते ततो यल्लब्धं तस्याचापं प्राग्वत्साध्यं तच्चापमेव प्र-स्तुतनक्षत्रस्य सौम्या याम्याश्च क्रान्तिभागा भवन्ति। एषां सौम्यत्वं याम्यत्वं च कथमित्युच्यते दिगैक्ये क्रान्तिबाणयो-र्योगात्तत्र दिक् सम्यस्यैव क्रान्तिर्दिक् भेदेऽधिकान्यूने पातिते शेषात् प्रस्तुतनक्षत्रस्य दिक् स्यात्। यथोदाहरणम्। मेषाश्रितत्वादुत्तरगोले सायनो रोहिणीनक्षत्रस्य ध्रुवकः २।१।२२।५२ शरो याम्यः ५।१० अत्र पात्याभावादयमेव भु-जको भुजः भुजांशाः ६१।२२।५२ एषां क्रान्तिरानीयते यथा क्रान्तिफलज्याकोष्ठकेषु भुजभागानाम् ६१ षष्ट्याश्रितं फलं १२२८।५७ तदग्रेऽन्तरं १२।२४ अनेनान्तरेण भुजभागा-नामधःस्थितकलाविकला २२।५२ गुणिते षष्ट्या भक्ते लब्धं कलादिफलं ४।५४ पूर्वफले १२२८।५७ क्षिप्ते जाता क्रान्तिः कलात्मिका १२३३।५१ एवं सर्वत्रापि क्रान्तिः साध्या। अथवा षष्ट्या भागे लब्धा भागादिक्रान्तिरुत्तरा २०।३३।५१ रोहिणीशरो याम्यः ५।१० अत्र भिन्नदिक्त्वादन-योर्वियोगेऽधिकत्वात्क्रान्तिः शरे पातिते शेषमुत्तरं १५।२३।५१ अस्याप्राग्वत्साधिता जीवा ८५७।५० इयं परमक्रान्तेः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२३।२५ कोटिज्यया ३२८८।१२ गोमूत्रिकया गुणिते ३११६००८३।४४ अस्याः प्रागानीतक्रान्तेः २०।३५।५१ कोटिज्यया ३३६९।४४ भागे लब्धं फलं ९२७।४७ अस्याप्यायत् चापं १५।५।५८ एतच्चापमेव क्रान्त्यंशाः एते प्रागानीतक्रान्त्यंशैस्तुल्याः सौम्यत्वात्सौम्या बोध्याः क्रान्त्यानयने पूर्वोक्तायाः संप्रयुक्तायाश्च युक्तेः कलासु विकलासु च किञ्चिदन्तरमिति तदल्पत्वान्न दोषाय।

अथ नक्षत्राणां स्वस्वध्रुवकेभ्यः स्पष्टदृक्कर्मानयनम्।

दृक्कर्मण्ययनं मत्वा मृगाद्यमथ कर्कटम्।
सत्रिभज्या परक्रान्तिमौर्व्यौ हत्वा विभाजिता ॥४८॥
उक्तोत्क्रान्तिकोट्याख्यमौर्व्या प्राप्तं फलं हि यत्।
तेन हत्वेषुकोटिज्या विभज्यान्त्यज्यया ततः ॥४९॥
लब्धात्कोदण्डकोटिज्या उत्पाद्य भशराङ्कुशः।
संताड्योक्तफलेनोक्तधनुःकोटिज्ययोद्धृतः ॥ ५० ॥
प्राप्तचापं तु दृक्कर्म फलं पूर्वोक्तयुक्तितः।
भक्षरचापयोरैक्ये फलं भेदे धनं भवेत् ॥ ५१ ॥

एषां व्याख्या दृक्कर्मानयने मृगाद्यं कर्काद्यं सौम्यायनं विचार्य मन्यादिभचक्रध्रुवकस्य त्रिराशिक्षेपात्क्रान्त्युत्क्रमज्यामानीय परमक्रान्ति २३।२५ मौर्व्या १४४०।२५

सन्ताद्य च प्रागानीतक्रान्तिकोटिज्यया विभज्य ततः प्राप्तेन फलेन बाणकोटिज्यां हत्वा अन्त्यज्यया पूर्वं भज्यते ततो लब्धस्य कोदण्डस्तत्कोटिज्यामानीयमुच्यते तदनु शरज्यामानीयोक्तफलाप्तेन हत्वा च प्रागानीतधनुःकोटिज्यया इयं ह्रियते ततो लब्धाच्चापं साध्यते तदेव दृक्कर्मफलं एकदिक्त्वादयनायनबाणयोरैक्ये कार्यं भिन्नदिक्त्वेन तयोर्भेदे धनं भवति तत्फलमिष्टवर्षस्य तस्मिन् ग्रन्थादिनक्षत्रध्रुवके यथोचितं कार्ये धने च कृते तच्चरं दृक्कर्मध्रुवं भवति। अत्रोदाहरणम्। यथा मकरादित्वादुत्तरायणे सायनो रोहिणीध्रुवकः २।१।३३।५२ शरोऽस्य याम्यः ५।१० रोहिणीध्रुवकात् राशित्रययुतात्प्राग्वदानीता भुजज्या १०१४।९ इयं परमक्रान्ति २३।३५ मौर्व्या १४३०।१५ गुणिता जाता १४६८८०४।३२ अस्याः पूर्वानीतरोहिणीस्फुटापक्रम १५।२२।६ कोटि ७४१३।५४ ज्यया २४७१।९ भागे लब्धं फलं ७।११।१४ अनेन रोहिणीशरः ५।१० कोटि ८४।५० ज्या ३५८५।२५ गुणिता जाता २५५००६७।५० अस्याः अन्त्यज्यया ३६०० भागे लब्धं ७०८।२१ अस्याः प्राग्वद्भागाद्यं धनुः ११।१०।५२ कोटिः ७८।४९।७ अतः प्राग्वज्ज्या ३५२९।२७ इयं धनुःकोटिज्यया भागाद्यं पृथक् स्थाप्यम्। अथ शर ५।१० ज्या ३२४।१० इयं पूर्वफलेन ७२२।२४ गुण्यते जाता २३०५५।८ अस्याः प्रागानीतधनुःकोटिज्यया ३५२९।२९ भागे लब्धं

६५।२८ एभ्यः प्राग्वच्चापं २।२ ११ इदमेव दृक्कर्मफलं रोहिणीनक्षत्रस्य सौम्यायनत्वात्तद्भागस्य च याम्यत्वादुभयोर्भेदे धनं कृत्वा रोहिणीध्रुवके क्षिप्यते जातं दृक्कर्मशुद्धं रोहिणीनक्षत्रमिदं २।२।१६।१४ एवं सर्वेषां नक्षत्राणां दृक्कर्म साध्यम्।

अथ प्रकारान्तरेण दृक्कर्मानयनम्।

**पूर्ववत्स्वचराशिज्या तत्क्षरेण हता हृता।**
**कृताभ्रनन्दवसुभि८९०४ र्लब्धं भागादिकं ततः॥५२॥**
**हतं निरक्षलग्नेन तद्विष्णुस्थितराशिना।**
**हृतं खखाग्नि ३०० भिर्भागादिकं दृक्कर्म पूर्ववत्॥५३॥**

अनयोर्व्याख्या पूर्ववदयनं विचार्य नक्षत्रध्रुवकोत्पन्ना सचराशिज्या तत्क्षरेण हत्वा कृताभ्रनन्दवसुभि ८९०४ र्विभज्य ततो यल्लब्धं भागादिकं तस्मान्निरक्षलग्नेन मेषादिलङ्कोदयविनाड्यो वसुभानि २७८ छिद्रनवयमा २९९ शिवरदा ३२३ इत्यादिना प्रस्तुतनक्षत्रसम्बन्धिलङ्कोदितमेषादित्रयममायेन हते खखाग्निभि ३०० र्भक्ते च लब्धं भागादिकमेव दृक्कर्मफलं भवति तत्सायनादभीष्टध्रुवके ऋणं धनं च कार्यम्। अत्रोदाहरणम्। यथा मकराद्युत्तरायणे सायनो रोहिणीध्रुवकः २।१।२३।५२ शरोऽस्य याम्यः ५।१० अस्य प्राग्वच्चराशिज्ये भुजज्या १७१४।८ एषा शरेण हत्वा जाता ८८५६।२६ इयं कृताभ्रनन्दवसुभि ८९०४ र्भक्ता लब्धं भागादिकमेव दृक्कर्म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फलं ०।५८।४० एतद्रोहिणीनक्षत्रस्य मिथुनराशिस्थत्वात्को-
ट्यमिथुनप्रमाणेन ३२२ गुणितं जातं ३२१।१२।२० एतत्-
खखाग्निभिः ३०० र्विभज्य लब्धं फलं १।४ एतदेव हक्कर्मफ-
लं प्राक्पश्चिमायनयोर्भेदे रोहिणीनक्षत्रे धनत्ववशात् देयं
जातं शुद्धं रोहिणीनक्षत्रं २।२।३८।६ अत्र प्रागानीतहक्कर्म-
युतस्य चान्तरं कला २ विकला ५२ स्वल्पान्तरत्वान्न दोषः।
अथ नक्षत्राणां संस्थापनवशेन सौम्ययाम्यस्वाहोराचानयनम्।

**स्वाहोरात्रानये सौम्ये यन्त्रे हीनाधिका क्रमात्।**
**सौम्ययाम्यापमांशैः स्यान्नवतिर्व्यत्ययः परे ॥५४॥**
**तयोर्द्वयोरङ्कयोर्या धुखण्डज्या समागता।**
**यन्त्रद्वयेऽपि नक्षत्रमुखं स्पष्टतरं भवेत् ॥ ५५ ॥**

अनयोर्व्याख्या यन्त्रे सौम्ययाम्यतया द्विधा भवति अत्र
सौम्ययन्त्रे स्वाहोरात्रानये नवतिर्नक्षत्राणां सौम्ययाम्यक्रा-
न्तिभागैर्हीना युक्ता स्यात्। परे याम्ययन्त्रे तु व्यत्ययः कोऽर्थः
सैव नवतिः ९० स्तैः सौम्ययाम्यक्रान्त्यंशैर्युता हीना च स्यात्।
तयोर्द्वयोरप्यङ्कयोर्नवतियुक्तयोर्हीनयोर्धुज्याखण्डकेभ्यः आगतं
धुज्याफलं नक्षत्राणां सौम्ययाम्यस्वाहोरात्रवृत्तं स्पष्टतरं
मुखं भवेत्। सौम्यस्वाहोरात्रस्योदाहरणं यथा रोहिण्याः
उत्तरा क्रान्तिः १५।२२।६ एषा सौम्यक्रान्तितया नवतिः
शोध्यते शेषा ७४।३७।५४ एभ्यः प्राग्वद्धुज्याखण्डकेभ्यः आ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीतं द्युज्याफलं १४।५८ एतदेव रोहिणीनक्षत्रस्य सौम्यं स्वाहोरात्रम्। अथ याम्यस्वाहोरात्रानयने उदाहरणम्। रोहिण्याः सौम्या क्रान्तिः १५।२२।६ एषा सौम्यत्वान्नवतेर्विशोध्यते जातं १०५।२२।६ अस्य द्युज्याखण्डकेभ्यः प्राग्वद् द्युज्याफलं २५।४७ एतद्रोहिण्या याम्यस्वाहोरात्रम्।

अथानीतांशस्थापनार्थं स्वाहोरात्रविचारपूर्वं नक्षत्रस्वरूपं किञ्चिदुच्यते।

अथ रव्यादयो ग्रहाः सनक्षत्राः स्पष्टाः पूर्वक्षितिजे उदयं प्रयान्ति ततो यावता कालेन पश्चिमक्षितिजे अस्तं प्रयान्ति स कालस्तेषां दिनमाह त एवास्तमितिताद्यावता कालेन पूर्वक्षितिजं प्रयान्ति स कालस्तेषां रात्रिः एत एव द्युज्याखण्डकेभ्यः स्वाहोरात्राण्युत्पाद्यन्ते।

अथ कतिचिन्नक्षत्राणि सौम्ययष्ट्यां कतिचिद्याम्ये कतिचिन्मध्ये भवन्ति तेषां लक्षणमुच्यते तत्र यस्य नक्षत्रस्य सौम्यस्वाहोरात्रं त्रिंशदंशमध्यगं याम्यं च त्रिंशदंशोर्ध्वगं तन्नक्षत्रं सौम्ये यष्ट्य एवोपयुज्यते यस्य तु याम्यं स्वाहोरात्रं त्रिंशदंशमध्यगं सौम्यं तु त्रिंशदूर्ध्वगं तन्नक्षत्रं याम्ययष्ट्य एवोपयुज्यते यस्य स्वाहोरात्रं द्वयमपि त्रिंशन्मध्यगं तन्नक्षत्रं मिश्रयष्ट्यां स्थाप्यते यथाभिजिन्नक्षत्रस्य सौम्यस्वाहोरात्रं ८।२७ याम्यं ६०।४८ एतन्नक्षत्रं सर्वदा सौम्ययष्ट्यां स्थाप्यते एवं अगस्त्यस्य सौम्यं स्वाहोरात्रं ५६।१२ याम्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



६।१२ एतन्नक्षत्रं सर्वदा याम्ययन्ले एव अत्र प्रस्तुतायां रोहिण्याश्च सौम्यं स्वाहोरात्रं १४।५८ याम्यं २५।४७ एतन्नक्षत्रं सौम्ये याम्ये मिश्रे चोपयुज्यते सौम्ययाम्यत्वं च दिशो लक्षात: सौम्यध्रुवं याम्यंध्रुवं वाभिलक्षीकृतोभयतो ज्ञेयं एवमन्येषामपि नक्षत्राणां स्वाहोरात्रसाधनं कार्यम्

अथेष्टाक्षांशेभ्योऽभीष्टनक्षत्राणामुन्नतांशानयनम् ।

अक्षस्यष्टक्रान्तिभागान्तरोत्थाः
सौम्या याम्यास्ते नतांशाः खमध्यात् ।
खाङ्का ९० हीनास्ते महीजोन्नतांशा
मध्यान्होत्थाः स्वस्वदेशे भवन्ति ॥ ५६ ॥
अक्षक्रान्त्योर्योगतश्चोन्नतांशाः
खाङ्कां ९० शेभ्यो वृद्धिभाजस्तदा च ।
हीनाः कार्या व्योमनागाद्विति १८० भ्यः
शेषास्ते स्युः स्वाक्षगाश्चोन्नतांशाः ॥ ५७ ॥

अनयोर्व्याख्या अक्षांशानां नक्षत्रस्पष्टक्रान्त्यंशानां च यदन्तरं कोऽर्थ: अधिकाङ्काद्धीनाङ्के पातिते यच्छेषं तदेव सौम्ययाम्यदिग्जातत्वेन नक्षत्राणां खमध्यात्सौम्या याम्याश्च नतांशा भवन्ति तेषु नतांशेषु नवतेः ९० पातितेषु शेषा नक्षत्राणां महीजात् क्षितिजवृत्तात् स्वदेशे मध्यान्होन्नतांशा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवन्ति यत्र तु भक्षांशानां कान्त्यंशानां चैकदिक्कात् योगे क्रियमाणे सति नवतेराधिक्यं भवति तत्र त्वशीत्यधिकशतात् १८० पातितेषु शेषं नक्षत्राणां मध्यान्तोन्नतांशा भवन्ति यन्मध्याह्ने ते ते याम्यगात् सौम्यसौम्यदेशे भिन्ना भवन्ति। अत्रोदाहरणम्। यथा मसृतायां रोहिण्याः स्फुटा क्रान्तिरुत्तरा १५।२२।६ दिवस्था याम्याक्षांशाः २८।२९।० अल्पत्वात्क्रान्त्यंशा अक्षांशेभ्यः पात्यन्ते शेषाः १३।१६।५४ एते या म्याक्षशेषत्वेन याम्या नतांशा बोध्याः एते नतांशा नवतेः पात्यन्ते शेषाः ७६।४३।६ एते रोहिण्याः परमोन्नतांशाः कथ्यन्ते। एतावन्तोंशान् रोहिणी अत्रोद्दिष्टभुजात् खमध्यमाक्रमतीति भावः। अनया युक्त्या सर्वेषां नक्षत्राणां नतोन्नतांशसाधनं कार्यम्। अथ प्रतीत्यर्थं संवत् १४४७ चैत्रशुक्ल १५ दिनादागामि १४८४ वर्षे अश्वादिद्वात्रिंशन्नक्षत्राणां क्रान्तिद्वयं सौम्ययाम्यत्वाद्दोरांशपरमोन्नतांशाः स्पष्टीकृत्य न्यासेन प्रदर्श्यन्ते यथा तद्दिने आरवीतेरिव ७७१ सावनचन्द्रः १२ अभूत्

अथ मकरादिलग्नत्रयस्य संख्याप्रमाणमाह।

मृगस्य हृत्प्रमितिः खरामा- ३०
स्तुलाजयोर्नन्दभुवोऽष्टरामाः १९।३८।
वार्कस्य सूर्याः क्षितिबाणवः १२।५१। स्या-
दन्त्येन्द्रमध्यादियमूहनीया॥ ५८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्य व्याख्या यन्त्रे वृत्तत्रयं भवति तत्र बहिर्मकरवृत्तं तस्यायामसंख्यादि त्रिंशत् ३० तल्लब्धमिदं द्वितीयं मेषतुलयोः तत्प्रमाणं अंशाः १९।३८ तृतीयं कर्कस्य तत्प्रमाणभागाः १२ कलाः ५७ एवं त्रिविधापि वृत्तमितिर्यन्त्रमध्यादिन्द्रादूषणीया । अत्राम्नायोऽयं । यन्त्रे स्वबुद्ध्या वृत्तं विधाय मध्या चतुर्दिक्षु त्रिंशदंशपरिकल्पनया बहिःस्थं मकरवृत्तं भवति तदनुमानप्रमाणेन मध्ये वृत्तद्वयं साध्यम् ।

अथ परमापमांशानां क्रमज्यां कोटिभागानामुत्क्रमज्यां चोत्पाद्य मेषतुलाकर्कवृत्तद्वयोत्पादनमाह ।

परापमांशास्त्रिकराः कलाश्च
शरागनय २३।३५ स्तत्क्रमजा च मौर्वी ।
शून्याब्धिशक्रास्तिथयोऽ १४४०।१५ थ कोटि-
भागाः षडङ्गानि शरेक्षणानि ६६।२५ ॥५९॥
तज्ज्याङ्कनन्दाक्षिगुणा द्विचन्द्राः ३२९९।१२
कोट्युत्क्रमज्याङ्कशरेन्दुदस्राः २१५९।४५ ।
बाणाब्धयः कोटिलवोत्क्रमज्या
त्रिंशद्गुणापक्रमकोटिमौर्व्यौ ॥ ६० ॥
हृताश्च यल्लब्धमिहांशकादि
तस्मात्स्फुटं मेषतुलाप्रमाणम् ।

For Private And Personal Use Only

तुलाजमानस्य हृतिः खरामैः ३०
हृताप्तमंशादि कुलीरमानम् ॥ ६१ ॥

एषां व्याख्या परमापमांशानां २३।३५ प्राग्वत्क्रमज्या १४४०।१५ अतो मेषतुलाहृत्समानीयते। इयं परमापमांशानां कोट्युत्क्रमज्या २१५९।४५ मकरहृत्तमानेन निघ्नता सद्गुणा जाता ६४७७०।१२५० अयस्तनाङ्कस्य षष्ट्या भागे लब्धं २२ तदूर्ध्वे उपरि जाता ६४७९२।३० अस्याः परमापक्रमकोटिज्यया ३२९९।१२ भागे लब्धांशाः १९ कला ३८ एतन्मेषतुलाहृत्प्रमाणं तस्य हृतिर्नाम वर्गः ३८५।२८ एषां खरामै ३० भागे लब्धांशाः १२ क ५१ एतत्कर्कहृत्प्रमाणं मकरहृत्प्रमाणं त्रिंशदंशाः सिद्धा एव ।

अथ व्यासार्धस्य तथा अपक्रमस्योत्पादनमाह ।

* परापमानां नरभागमौर्वी
हता नरस्योत्क्रमजीवया सा।
ततो विभक्ता परमापमाख्य-
मौर्व्यान्तिमज्यायुतया यदाप्तम् ॥ ६२ ॥
कोटिज्यया मिश्रितमर्हितं हि-
स्त्रिंशद्गुणं कोटिगुणेन भक्तम् ।
व्यासार्धं च तत्रासदृशं ततश्च ।
पूर्वं दृशे कोटिगुणोनिते च ॥ ६३ ॥

* अत्रोपपत्तिस्तु अन्यासो महुत्तेन प्रतिभागोपर्वकगच्छेद्यकविधिना बोध्या ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शेषं खरामै ३० गुणितं विभक्तं
कोटिज्यया प्राप्तमिदं लवादि ।
केन्द्रं भचक्रस्य भवेदवश्यं
तदन्ततो व्यासदलं भ्रमः स्यात् ॥ ६४ ॥

एषां व्याख्या परमापमांशानां २३।३५ या नरभागमौर्वी कोटिज्या सा तस्यैव नरस्य कोटिक्रमज्यया संगुण्य अन्त्यज्यया ३६०० गुणया परमापमज्यया भज्यते लब्धं लवादिकं कोटिज्यया मिश्रितमौर्वीतलं द्विःस्थाप्यं एकत्र त्रिंशता संगुण्य पूर्वोक्तया कोटिज्यया भक्तं लब्धं लवादिकं व्यासार्धं भचक्रे भवति। ततश्शेषितं पूर्वदलं कोटिज्यातः पातितं तच्छेषं त्रिंशता हत्वा पूर्वोक्तकोटिज्यया भज्यते ततो लब्धं लवादिकं भचक्रस्य केन्द्रं भवति। एतेन भचक्रकेन्द्रांशप्रमाणेन यन्त्रमध्यासौम्ये याम्ये च पक्षे चिह्नं कृत्वा तदुपरि व्यासार्धेन वृत्तं भ्राम्यम्। अत्रोदाहरणम्। परमापमांशाः २३।३५ एते नवतेश्शुद्धाः कोटिभागाः स्युः ६६।२५ अतः प्राक्तनक्रमज्या ३२८८।१२ तथा कोटिभागानामुत्क्रमज्या २१५८।४५ अनया कोटिक्रमज्यागुणिता जाता ७१२५४४७।१२ एषा परमापक्रमज्यया १४४०।१५ सहिता अन्त्यज्यया ५०४०।१५ भज्यते लब्धाः १४१३।४२ एते कोटिज्यायां त्रिप्यन्ते जाताः ४७१२।५४ एतेऽङ्कीकृत्य द्विधा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२३५६।२७ अनयोरैक्यं फलं २३५६।२७ त्रिंशता गुणितं जातं ७०६८३।१० इदं कोटिज्यया ३२८८।१२ भज्यते लब्धं व्यासदलस्य प्रमाणं भागादि २१।२६ अथ पृथक्स्थितं फलं २३५६।२७ कोटिज्यातः पात्यं ३२८८।१२ शेषं ८४२। ४५ त्रिंशता गुणितं २८२८२।३० एतस्मिन् कोटिज्यया ३२८८।१२ भक्ते लब्धं भचक्रकेन्द्रं भागाद्यं ८।३४ ।

अथानीतभचक्रकेन्द्रव्यासार्द्धयोः प्रमाणमाह ।

भागा भचक्रकेन्द्रस्याष्टौ
लिप्ता वेदवन्हयः ८।३४।
व्यासार्द्धस्य भरादीधो
रसनेत्राणि च क्रमात् २१।२६ ॥ ६५ ॥

स्पष्टार्थः ।

अथ भमण्डलार्थं लङ्कोदयप्रमाणानां प्रत्यंशभागादिषु युक्तिरुच्यते ।

निरक्षलङ्कोदयलग्नमानात्
स्फुटं फलं यत्प्रतिभागमेति ।
यथोचितं तद्गणकेन योज्यं
भमण्डले स्वधिमितेऽपि यन्त्रे ॥ ६६ ॥

अस्य व्याख्या यन्त्रं तावद्दानवते ८० ऐक १ द्वि २ त्रि ३ पञ्च ५ षट् ६ दश १० प्रमाणोन्नतांशवलयत्रकलमया



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोटा भवति षण्णामपि सद्यन्त्राणामुन्नतवलयानां भचक्र-स्थापनार्थं निरक्षे लङ्कास्थाने द्वादशानामपि मेषादीनां लग्नानां प्रमाणं दशभिर्भक्ता प्रत्येकं तेषामंशादिकमानीय त्रिंशद्भिर्भक्ता तस्मादपि प्रत्यंशभागादिकं फलमुत्पाद्य च एकैकलग्नस्य त्रिंशदंशपर्यन्तं तत्सर्वेष्वपि यन्त्रेषु भमण्डले गणकेन यथोचितं स्थाप्यम्। अत्रोदाहरणम्। लङ्कायां मेषप्रमाणं २७८ वृषस्य २९९ मिथुनस्य ३२३ एतेऽप्युत्क्रमेण कर्कसिंहकन्यानां भवेयुः। तथा एते षडपि उत्क्रमात्तुला-दीनां स्युः। दशभिः पलैरेको भागो जायते। अथ दशांशकोत्पत्तिः। खगोले कालचक्रभचक्रयोः परिधिद्वयमस्ति तत्र यः कालचक्रपरिधिः स त्रिंशत्रिंशत्परिमितैस्समांशैर्भक्तः पञ्चपञ्चघटीतुल्यैकं लग्नं स्यात्। एवमहोरात्रस्य षष्टिघटीभि ६० द्वादशलग्नात्मको भगणः सम्पूर्णः स्यात्। तत्राहोरात्रस्य षष्टिघटीनां पलानि ३६०० भगणांशैर्भक्तानि दश लब्धाः अतो लङ्कोदयानां दशभिर्भागदानात् प्रत्येकमंशाः प्राप्ताः एवं स्वदेशोदयानामप्यंशाः साध्याः अन्यच्च कालचक्रे परिधिच-क्रांशानां प्रत्येकं लङ्कोदयांशैर्विभजना क्रियते। अत्राप्यहो-रात्रेषु भचक्रे परिधिन्यूनाधिकं पञ्चघटीभिर्मेषलग्नं त्रिंश-दंशात्मकं स्यात्। यथा निरक्षे मेषलग्नांशादि २७।४८ परिमितिर्जायते अनया युक्त्या कालचक्रभचक्रयोः परिधी समविषमभागैर्भगणं पूरयतः। अथ मेषादिलग्नत्रयाणां

For Private And Personal Use Only

प्रत्यंशस्थापनार्थं नक्षत्यंशपर्यन्तं प्रदर्श्यते । यथा भचक्रस्य स्थापनार्थमुदाहरणं मेषादि २७।४८ रस्य त्रिंशता भागे लब्धं ०।५५।३६ अंशफलं प्रत्यंशयुतं १।५१।१२॥२।२६।४८॥ ३।४२।२४ आयाति ।

अथ इष्टशङ्कोः छायाकर्णसाधनम् ।

**क्रमान्नतोन्नतांशानां जीवा साध्या कलादिका ।**
**नतज्या स्वस्वशङ्कुघ्नी विभक्ता चोन्नतज्यया ॥६७॥**
**अङ्गुलाद्यं फलं यत्स्यात्तज्ज्ञेयं स्वस्वशङ्कुजम् ।**
**त्रिजीवा स्वस्वशङ्कुघ्नी छेदेनाप्ता फलश्रुतिः ॥६८॥**

अनयोर्व्याख्या उदाहरणेनैव नतांशाः ८९ उन्नतांशाः १ नतज्या ३५९९।२७ उन्नतज्या ६२।५० नतज्यां द्वादशभिः संगुण्य उन्नतज्यया विभज्य लब्धं द्वादशाङ्गुलशङ्कोः छाया-फलमङ्गुलाद्यं ६८७ २५ कर्णानयने त्रिज्यां ३६०० द्वदश-भिः संगुण्य ४३२०० उन्नतज्यया ६२।५० विभज्य लब्धं सप्ताङ्गुलशङ्कोः छायाफलमङ्गुलादिकः कर्णः ६८७।३२ पुनरपि नतज्यां सप्तभिः संगुण्य उन्नतज्यया विभज्य लब्धं सप्ताङ्गुलशङ्कोः छायाफलमङ्गुलाद्यं ४००।० त्रिज्यां सप्तभिः संगुण्य २५२०० उन्नतज्यया ६२।५० सं अङ्गुलादिकः कर्णः ४१० एवं नवाङ्गुलशङ्कोः छायाफलं कर्णश्च साध्यः ।

**तिग्मांशुसप्ताङ्गुलशङ्कुजाता**
**छाया नवत्युन्नतभागकानाम् ।**
**चिरन्तनाचार्यवरैः प्रदिष्टा**
**प्रदर्श्यते सद्गणकोपयुक्त्यै ॥ ६९ ॥**

छायाज्ञानार्थं सारणी ।

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुक्लांशाः | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ |
| द्वादशाङ्गुल- | ६८७ | ३४३ | २४६ | १७१ | १३७ | ११४ | ९७ | ८५ | ७५ | ६८ | ६१ | ५६ | ५१ | ४८ |
| शङ्कुच्छायाः | २५ | ३८ | ३१ | ३६ | १० | १० | ४४ | ४३ | ४६ | ३ | ४४ | २६ | ५९ | ८ |
| समाङ्गुलशङ्- | ४०१ | २०० | १४२ | १०५ | ९० | ६६ | ५७ | ४९ | ४४ | ३९ | ३६ | ३२ | ३० | २८ |
| कुच्छायाः | ० | २७ | ३४ | ६० | ० | ३६ | २ | ४८ | १२ | ४० | १ | ५६ | २९ | ५ |

छायाज्ञानार्थं सारणी ।

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुक्लांशाः | १५ | १६ | १७ | १८ | १९ | २० | २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ |
| द्वादशाङ्गुल- | ४४ | ४१ | ३९ | ३६ | ३४ | १२ | ३१ | २९ | २८ | २६ | २६ | २५ | २४ | २२ |
| शङ्कुच्छायाः | ४६ | ५१ | १५ | ५४ | ५५ | १८ | १६ | ४२ | १६ | ५७ | २७ | २७ | ३३ | ३४ |
| समाङ्गुलशङ्- | २६ | २४ | २२ | २१ | २० | १९ | १८ | १७ | १६ | १५ | १५ | १४ | १३ | १३ |
| कुच्छायाः | ७ | २५ | ५१ | ३१ | २१ | २३ | १४ | ३० | २९ | ४३ | १ | २१ | ४४ | १४ |

छायाज्ञानार्थं सारणी।

| उन्नतांशाः | २९ | ३० | ३१ | ३२ | ३३ | ३४ | ३५ | ३६ | ३७ | ३८ | ३९ | ४० | ४१ | ४२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| द्वादशाङ्गुल- | २१ | २० | १९ | १९ | १८ | १७ | १७ | १६ | १५ | १५ | १४ | १४ | १३ | १३ |
| शङ्कुछायाः | ४० | ४४ | ५८ | ३२ | २९ | ४७ | ८ | ३१ | ५६ | २२ | ५९ | ३८ | ४८ | १४ |
| समाङ्गुल- | १२ | १२ | ११ | ११ | १० | १० | १० | ९ | ९ | ८ | ८ | ८ | ८ | ७ |
| शङ्कुछायाः | ४० | ५ | २९ | १२ | ४७ | २२ | ० | ३७ | १७ | ५७ | २९ | २७ | ३ | ४१ |

छायाज्ञानार्थं सारणी।

| उन्नतांशाः | ४३ | ४४ | ४५ | ४६ | ४७ | ४८ | ४९ | ५० | ५१ | ५२ | ५३ | ५४ | ५५ | ५६ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| द्वादशाङ्गुल- | १२ | १२ | ११ | ११ | १० | १० | ९ | ९ | ९ | ९ | ८ | ८ | ८ | ७ |
| शङ्कुछायाः | ५३ | २६ | ३६ | ११ | ४६ | २६ | ४६ | ४२ | २४ | ३ | ४३ | २४ | ६ | ४८ |
| समाङ्गुल- | ७ | ७ | ६ | ६ | ६ | ६ | ५ | ५ | ५ | ५ | ५ | ४ | ४ | ४ |
| शङ्कुछायाः | ३० | १५ | १५ | ११ | ८ | ५ | ५५ | ४० | २८ | १७ | ५ | ५४ | ४८ | ३२ |

## छायाज्ञानार्थं सारणी।

| उन्नतांशा: | ५७ | ५८ | ५९ | ६० | ६१ | ६२ | ६३ | ६४ | ६५ | ६६ | ६७ | ६८ | ६९ | ७० |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| द्वादशाङ्गुल-<br>शङ्कुच्छाया: | ७<br>१० | ७<br>१० | ६<br>५६ | ६<br>२६ | ६<br>३१ | ६<br>६ | ५<br>५२ | ५<br>२५ | ५<br>११ | ५<br>५ | ४<br>५१ | ४<br>३६ | ४<br>२२ | ४<br>२२ |
| सप्ताङ्गुल-<br>शङ्कुछाया: | ४<br>२३ | ४<br>१३ | ४<br>३ | ३<br>५१ | ३<br>४३ | ३<br>३४ | ३<br>२६ | ३<br>१५ | ३<br>७ | २<br>५९ | २<br>५० | २<br>४२ | २<br>४१ | २<br>३२ |

## छायाज्ञानार्थं सारणी।

| उन्नतांशा: | ७१ | ७२ | ७३ | ७४ | ७५ | ७६ | ७७ | ७८ | ७९ | ८० | ८१ | ८२ | ८३ | ८४ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| द्वादशाङ्गुल-<br>शङ्कुछाया: | ४<br>८ | ३<br>५४ | ३<br>४० | ३<br>२७ | ३<br>११ | ३<br>११ | ३<br>० | २<br>३३ | २<br>२२ | २<br>७ | १<br>४४ | १<br>४३ | १<br>३६ | १<br>२६ |
| सप्ताङ्गुल-<br>शङ्कुछाया: | २<br>२४ | २<br>१६ | २<br>८ | २<br>८ | २<br>० | १<br>५३ | १<br>४५ | १<br>३३ | १<br>२९ | १<br>२२ | १<br>१४ | १<br>७ | ०<br>५९ | ०<br>५१ |

## छायाभानार्थं सारणी।

| नतांशाः | ८५ | ८६ | ८७ | ८८ | ८९ | ९० |
|---|---|---|---|---|---|---|
| द्वादशाङ्गुल-शङ्कुच्छायाः | १<br>४ | ०<br>५१ | ०<br>३८ | ०<br>२५ | ०<br>१२ | ०<br>० |
| सप्ताङ्गुल-शङ्कुच्छायाः | ०<br>४४ | ०<br>३६ | ०<br>२८ | ०<br>२२ | ०<br>७ | ०<br>० |

## मेषादीनां प्रत्यंशफलं

| भागाः | १ | २ | ३ | ४ | ५ | ६ |
|---|---|---|---|---|---|---|
| अंशफलं | ०<br>५६ | १<br>५१ | २<br>४७ | ३<br>४३ | ४<br>३८ | ५<br>३४ |
| अन्तरं | ०<br>५५ | ०<br>५६ | ०<br>५६ | ०<br>५६ | ०<br>५६ | ०<br>५६ |

## मेषादीनां प्रत्यंशफलं

| भागाः | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंशफलं | ६<br>३० | ७<br>२५ | ८<br>२१ | ९<br>१७ | १०<br>१२ | ११<br>८ | १२<br>४ | १२<br>५९ | १३<br>५५ | १४<br>५१ | १५<br>४६ | १६<br>४२ | १७<br>३८ | १८<br>३३ |
| अन्तरं | ०<br>५६ | ०<br>५६ | ०<br>५६ | ०<br>५६ | ०<br>५६ | ०<br>५६ | ०<br>५५ | ०<br>५६ | ०<br>५६ | ०<br>५६ | ०<br>५५ | ०<br>५६ | ०<br>५५ | ०<br>५६ |

मेषादीनां प्रत्यंशफलं

| भागाः | २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ | २९ | ३० | ३१ | ३२ | ३३ | ३४ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंशफलं | १९ २९ | २० २५ | २१ २० | २२ १६ | २३ १२ | २४ ७ | २५ ३ | २५ ५८ | २६ ५४ | २७ ५० | २८ ५० | २९ ५० | ३० ४९ | ३१ ४९ |
| अन्तरं | ० ५६ | ० ५५ | ० ५६ | ० ५६ | ० ५५ | ० ५६ | ० ५६ | ० ५५ | ० ५६ | १ ० | १ ० | ० ५९ | १ ० | १ ० |

मेषादीनां प्रत्यंशफलं

| भागाः | ३५ | ३६ | ३७ | ३८ | ३९ | ४० | ४१ | ४२ | ४३ | ४४ | ४५ | ४६ | ४७ | ४८ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंशफलं | ३२ ४९ | ३३ ४९ | ३४ ४९ | ३५ ४९ | ३६ ४८ | ३७ ४८ | ३८ ४८ | ३९ ४८ | ४० ४८ | ४१ ४८ | ४२ ४७ | ४३ ४७ | ४४ ४७ | ४५ ४७ |
| अन्तरं | १ ० | १ ० | १ ० | ० ५९ | १ ० | १ ० | १ ० | १ ० | १ ० | ० ५९ | १ ० | १ ० | १ ० | १ ० |

मेषादीनां प्रत्यंशफलं

| भागाः | ४९ | ५० | ५१ | ५२ | ५३ | ५४ | ५५ | ५६ | ५७ | ५८ | ५९ | ६० | ६१ | ६२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंशफलं | ४६<br>४७ | ४७<br>४७ | ४८<br>४६ | ४९<br>४६ | ५०<br>४६ | ५१<br>४६ | ५२<br>४६ | ५३<br>४५ | ५४<br>४५ | ५५<br>४५ | ५६<br>४५ | ५७<br>४५ | ५८<br>४९ | ५९<br>५४ |
| अन्तरं | १<br>० | ०<br>५९ | १<br>० | १<br>० | १<br>० | १<br>० | १<br>० | ०<br>५९ | १<br>० | १<br>० | १<br>० | १<br>४ | १<br>५ | १<br>४ |

मेषादीनां प्रत्यंशफलं

| भागाः | ६३ | ६४ | ६५ | ६६ | ६७ | ६८ | ६९ | ७० | ७१ | ७२ | ७३ | ७४ | ७५ | ७६ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंशफलं | ६०<br>५८ | ६२<br>३ | ६३<br>७ | ६४<br>१२ | ६५<br>१६ | ६६<br>२१ | ६७<br>२५ | ६८<br>३० | ६९<br>३४ | ७०<br>३९ | ७१<br>४३ | ७२<br>४८ | ७३<br>५२ | ७४<br>५७ |
| अन्तरं | १<br>५ | १<br>४ | १<br>५ | १<br>४ | १<br>५ | १<br>४ | १<br>५ | १<br>४ | १<br>५ | १<br>४ | १<br>५ | १<br>४ | १<br>५ | १<br>४ |

मेषादीनां प्रत्यंशफलं

| भागाः | ७७ | ७८ | ७९ | ८० | ८१ | ८२ | ८३ |
|---|---|---|---|---|---|---|---|
| अंशफलं | ७६ १ | ७७ ६ | ७८ १० | ७९ १५ | ८० १९ | ८१ २४ | ८२ २८ |
| अन्तरं | १ ५ | १ ४ | १ ५ | १ ४ | १ ५ | १ ४ | १ ५ |

मेषादीनां प्रत्यंशफलं

| भागाः | ८४ | ८५ | ८६ | ८७ | ८८ | ८९ | ९० |
|---|---|---|---|---|---|---|---|
| अंशफलं | ८३ ३३ | ८४ ३७ | ८५ ४२ | ८६ ४६ | ८७ ५१ | ८८ ५५ | ९० ० |
| अन्तरम् | १ ४ | १ ५ | १ ४ | १ ५ | १ ४ | १ ५ | १ ० |

अभूद्भृगुपुरे वरे गणकचक्रचूडामणिः
कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः ।
तदीयपदशालिना विरचिते सुयन्त्रागमे
महेन्द्रगुरुणा स्फुटा गणितकर्मपूर्तिः कृता ॥७०॥

स्पष्टार्थः ।

श्रीपेरोजनृपेन्द्रसर्वगणकः पृष्टो महेन्द्रप्रभु-
र्जातः सूरिवरस्तदीयचरणाम्भोजैकभृङ्गयुता ।
सूरिश्रीमलयेन्दुना विरचिते सद्युक्तियन्त्रागम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्याने गणिताभिधप्रथमकोऽध्यायः समाप्तिं गतः ॥

इति श्रीयन्त्रराजागमे गणिताध्यायः समाप्तः ।

अथ यन्त्रघटनाध्यायो व्याख्यायते ।

आदौ यन्त्रं सूत्रमयं धातुजं वा
विस्तीर्णं च स्वेच्छया कारयित्वा ।
दैर्घ्यव्यासौ पालिवृत्तस्य तस्मि-
न्नार्यैः कार्यौ यन्त्रवक्त्रानुमानात् ॥ १ ॥

अस्य व्याख्या सुप्रसिद्धा भातश्च पित्तलाद्या सूत्रमयं धातुमयं वा यन्त्रं विस्तीर्णं विस्तारायतं च कारयित्वा यन्त्रमुखानुमानात् तस्मिन्यन्त्रे पालिवृत्तदैर्घ्यव्यासौ आयामविस्तारौ आर्यैः कार्यौ विस्तीर्णमिति पदं स्वेच्छयेत्यत्र योज्यं ततो यावतीच्छा तावद्विस्तीर्णं कार्यमित्यर्थः ।

याम्ये भागेऽस्य त्रिकोणं किरीट-
मीदृक् प्रोक्तं कोष्ठकागारमेतत् ।
मध्ये तस्य स्वेच्छयाक्षांशकानां
पत्राण्यन्यान्युन्नतांशाश्रितानि ॥ २ ॥

अस्य व्याख्या कार्यमित्यनुवर्त्य यस्य यन्त्रस्य याम्ये दक्षिणे भागे त्रिकोणं किरीटं शिरःस्थितत्वान्मुकुटसदृशं कार्यं ईदृक् एतादृशं कोष्ठकागारमिति प्रोक्तं तस्य कोष्ठका-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गारमध्ये अन्यान्युन्नतांशवलयैराश्रितान्यन्यांशानां पत्राणि स्वेच्छया कार्याणि स्वेच्छयेति कोऽर्थः यावतां देशानां पत्राणि कर्त्तुमिच्छति तावन्ति कार्याणि पत्रे पत्रे चोपरि भिन्नदेशोत्पन्नोन्नतवलयानि कार्याणि ।

एकं पत्रं चोन्नतांशस्य पश्चाद्-
द्विघ्नं पिण्डे साधनीयं ततोऽन्यत् ।
तत्क्रोत्पन्ना राशयो मेषमुख्याः
संस्थाप्यन्ते यन्त्रधिष्ण्यैः समेताः ॥ ३ ॥

अस्य व्याख्या ततस्तदनन्तरं उन्नतांशपत्रादेकं पत्रमन्यत् पिण्डे द्विगुणं साधनीयं यस्मिन्पत्रे तत्क्रोत्पन्ना मेषाद्या द्वादश राशयो धिष्ण्यैः सहिताः स्थाप्यन्ते । इदं च पत्रं भचक्राधिष्टितत्वाद्भपत्रमित्युच्यते ।

पत्राण्येवं कोष्ठकागारमध्ये
मुक्त्वा साध्यास्तेषु पूर्वादिकाष्ठाः ।
पृष्ठे यन्त्रस्यायते द्वे भुजाग्रे
सूक्ष्मे कृत्वा छिद्रमन्तर्भुजं च ॥ ४ ॥

अग्रे पश्चात्तस्य चाथावधिकोणे
कुर्याच्छिद्रे यन्त्रमेचे निवेश्य ।
छिद्रे क्षिप्ता मेरुकीलं दलाकीं
तेन छित्वा घोटिकास्मिन्निवेश्या ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनयोर्व्याख्या एवं पूर्वोक्तविधिना पञ्चापि कोष्ठकागारमध्ये मुक्त्वा पूर्वा परा सौम्या याम्या चतस्रो दिशः साध्याः। ततो यन्त्रपृष्ठप्रदेशे च आयतं भुजं कृत्वा तदग्रे द्वे सूक्ष्मे च तथास्य भुजस्य मध्ये छिद्रं कृत्वा तस्य छिद्रस्याग्रे पश्चाच्च छिद्रे चतुःकोणयन्त्रनेत्रे निवेश्य छिद्रे भुजमध्यविवरे मेरुसंज्ञं कीलं च क्षिप्त्वा तेन मेरुकीलेन कोष्ठकागारसहितां दृष्टार्थां विद्ध्वा अथ मेरुकीले चोटिका अश्वयज्ञाकारा कीलिका देया।

कृत्वा छिद्रं सूक्ष्ममस्य त्रिकोणे
तत्र क्षिप्त्वा कण्टकं वृश्चिकाभम्।
तस्य प्रान्ते मुद्रिका लम्बिकाख्या
सूत्रं देयं यन्त्रनिष्पत्तिरेवम्॥ ६॥

अस्य व्याख्या अस्य यन्त्रस्य त्रिकोणे सूक्ष्मं छिद्रं कृत्वा तत्र वृश्चिकमुखाभं कण्टकं क्षिप्त्वा तत्प्रान्ते मुद्रां च दत्त्वा मुद्राप्रान्ते लम्बिकाख्यं सूत्रं देयं एवं यन्त्रनिष्पत्तिर्भवेत्।

अभूद्भृगुपुरे वरे गणकचक्रचूडामणिः
कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः।
तदीयपदशालिना विरचिते सुयन्त्रागमे
महेन्द्रगुरुणोदितं घटनकर्म यन्त्रस्य तु॥ ७॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीपिरोजसूपेन्द्रसर्वगपकः सृष्टी महेन्द्रप्रभु-
जातः सूरिवरस्तदीयचरणाम्भोजैकभृङ्गयुता ।
सूरिश्रीमलयेन्दुना विरचिते सद्युक्तियन्त्रागम-
व्याख्याने विशदे च यन्त्रघटनाध्यायो द्वितीयो गतः ॥

इति श्रीयन्त्रराजागमे घटनाध्यायः समाप्तः ।

अथ यन्त्ररचनाध्यायो व्याख्यायते ।

यन्त्रं प्रोक्तं षड्विधं ह्यानवत्या १०
एक १ द्वि २ त्री ३ प ५ र्तु ६ पङ्क्त्यंश १० कैश्च ।
द्वेधाप्येतत्सौम्ययाम्यप्रभेदात्
तन्मिश्रत्वे मिश्रसंज्ञं परं च ॥ १ ॥

व्याख्या आनवतेरेक १ द्वि २ त्रि ३ पञ्च ५ षट् ६ पङ्क्ति १० उन्नतांशपरिकल्पनया यन्त्रं षड्विधं प्रोक्तं चतुर्भिरंशैर्नवतेर्भजनं न संभवतीति नोक्तं एतदेव सौम्ययाम्यप्रभेदात् द्वेधा स्यात् तन्मिश्रत्वे मिश्रसंज्ञं परं यन्त्रं प्रोक्तम् ।

वृत्तद्वयं कर्कटकेन वृत्ते
यन्त्रस्य निर्माय चतुर्दिशोऽङ्क्याः ।
प्राग्याम्यगाः कोष्ठगतास्ततश्च
स्थाप्याः खनन्दप्रमितोन्नतांशाः ॥ २ ॥

व्याख्या पूर्वोक्तयुक्त्या घटितयन्त्रस्य कोष्ठकागारस्य पा-

For Private And Personal Use Only

मध्यभागे कर्कटाख्येन लोहयन्त्रेण वृत्तत्रयमुपरितनं मध्य-मधःस्थं च लघु विधाय प्राच्याद्याश्चतस्रो दिशो रेखाद्वयेनाङ्क्याः। तत्र पूर्वस्मिन् वृत्ते पूर्वदक्षिणादिमध्ये केन्द्राभिमुखाः को-ष्ठगता नवतिप्रमिता उन्नतांशा रेखितैरेकाद्यङ्कैः स्थाप्याः।

अथ द्वितीयवृत्तस्य लेखनमाह।

वृत्ते द्वितीये लिखितोन्नतांशा<br>
रेखा विलेख्याः प्रतिभागजाताः।<br>
पश्चाद्येऽपक्रमजा विभागाः<br>
शङ्कुप्रभा प्राग्विदिता तथा ज्या ॥ २ ॥

व्याख्या अधस्तनवृत्ते उपरितनलिखितानामुन्नतांशाना-मङ्कानुसारेण प्रतिभागजाता रेखा विलेख्याः। ततो दक्षिण-पश्चिमान्तरालेऽपक्रमभागा लेख्याः। तथा पश्चिमसौम्यान्त-राले वृत्तमध्ये समाङ्गुलकायां लिखित्वा तदधस्तादुभयतः पश्चिमसौम्यरेखालग्नान् द्वादशकोष्ठकान् कृत्वा पश्चिमोत्त-ररेखातो मध्यं यावदेकादिद्वादशाङ्गुलान् विलिख्य तेषा-मधस्तात्ततः पश्चिमसौम्यरेखाप्रतिभागजाताङ्गुलाद्या रेखा विलेख्याः। तत उत्तरपूर्वान्तरालकोष्ठकेषु जीवा विलेख्या। चतुर्षु भागानां रेखाः केन्द्रसम्मुखा एव कार्याः कदाचिद्यन्त्रे शङ्कुद्वयस्यापि छाया लिखिता न भवति तदा छायाटीका-यां द्रष्टव्या। एवं यन्त्रस्य पृष्ठभागसाधना सम्पूर्णा जाता।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कोष्ठकागारस्य पूर्वपक्षसाधनम् ।

वृत्तत्रये पालिगते कृते प्राक्
वृत्ते किरीटान्तरतो घटीश्च ।
अंशानभीष्टान् खरसाग्नि ३६० संख्या
रेखास्तदीयास्तदधो विलेख्याः ॥ ४ ॥

व्याख्या यन्त्रे कोष्ठकागारस्य पूर्वभागे पाल्यां कर्कटामेण वृत्तत्रये कृते सति प्रथमे नाड्याख्यवृत्ते किरीटमध्यात् षष्टिघटिका विलेख्याः । तदधः चिकीर्षितैकाद्युन्नतांशानुसारेण कोष्ठकान् विधाय चतुर्दिक्षु नवतिरंशाः षष्टिताङ्ककैर्लेख्याः उपरितनस्य वृत्तस्य नाडीरूपत्वात्तदधःस्थितद्वितीयवृत्ते पलरूपा रेखा प्रतिकोष्ठं यथोचितं लेख्याः ।

अथ सौम्ययाम्ययन्त्रे इष्टांशपञ्चपूर्णनतवलयानां साधनमाह ।

यन्त्रेऽथ सौम्ये विरचय्य कम्बां
यन्त्रानुमानेन विलिख्य तत्र ।
भागान् खरामान् ३० रचयेत्तदंशैः
कर्कादिवृत्तं त्रितयं दलेषु ॥ ५ ॥

व्याख्या सौम्ये यन्त्रे इष्टांशपञ्चापि काष्ठमयफलके काचया दृढं सन्निवेश्य यन्त्रानुमानेनैकां कम्बां विधाय तत्र त्रिंशदंशान् परिकल्प्य कम्बास्थितैरंशैः कर्कप्रमाणेन १२।५१

मेषतुलाप्रमाणेन १९।३८ मकरप्रमाणेन २० यन्त्रमध्यात् कर्कटकेन वृत्तत्रयमालिखेत् ।

दिगङ्कितेष्वेषु च मध्यकेन्द्रा-
द्याम्यरेखोपरिकेन्द्रमानैः ।
चिन्हे कृते तच्छिरसः पृथुत्व-
मानेन वृत्तानि लिखेत् स्फुटानि ॥ ६ ॥

व्याख्या ततः पूर्वादिदिगङ्कितेषु याम्यरेखोपरि केन्द्रहेतवे त्रिंशदधिकांशस्थापनार्थं ताम्रमयीं पट्टिकां विन्यस्य मध्यकेन्द्राद्याम्यरेखोपरि केन्द्रनामिकाङ्कितांशानां प्रत्येकं केन्द्रमानैः कर्कटकेन चिह्नं कृत्वा तच्छिरसः तन्मूर्धतः पृथुत्वस्य व्यासस्य मानेन स्फुटानि वृत्तानि लिखेत् ।

भूजाख्यमाद्यं भवतीह वृत्तं
ततः परं चोन्नतमण्डलानि ।
तेषां लिखेदानवतेर्विभागान्
युक्तानिनाड्युन्नततावगत्यै ॥ ७ ॥

व्याख्या एषु वृत्तेषु प्रथमं भूजाख्यं वृत्तं शेषाणि उन्नतांशानां वृत्तानि भवन्ति इति शेषः । एषु च वृत्तेषु पूर्वोक्तैकाद्यंशपरिकल्पनया आनवतेस्तद्विभागानुन्नतांशान् लिखेत् किमर्थं इनस्य सूर्यस्य आदिशब्दाच्छेषाणां ग्रहाणां धिष्ण्यानां च उन्नततावगत्यै सूर्याद्युन्नतत्वज्ञानायेत्यर्थः ।

मध्याह्नरेखामभितोऽथ कर्क-
वृत्तस्थिते प्रागपरे विभागे ।
क्रमाल्लिखेद्वा परमं दिनं च
देशाभिधानेन तथाक्षभागान् ॥ ८ ॥

व्याख्या मध्याह्नरेखामभितः उभयतः कर्कटकेन वृत्तमध्यस्थिते पूर्वापरविभागे क्रमाद्वा विषुवच्छायां परमं दिनमुत्कृष्टदिनमानं च देशनामसहितानक्षांशांश्च विलिखेत्स्थापयेदित्यर्थः ।

अथ सौम्ययाम्ययन्त्रे होरास्थापनमाह ।

कुजाद्धो द्वादशधा विभज्य
मृगादिकर्काद्ययमण्डलेषु ।
विधाय वृत्तान्यभितः प्रतीच्या-
मर्कैर्निवेश्या द्विदशापि होराः ॥ ९ ॥

अस्य व्याख्यां कुजादपरक्षितिजात्पूर्वक्षितिजाच्चाधस्तात् मकरमेषकर्काद्ययमण्डलेषु द्वादशधा विभज्य वृत्ता कर्कटेन वृत्तत्रयस्पर्शपूर्वमभितः पूर्वापरविभागे वृत्तानि विधाय प्रतीच्याः पश्चिमदिग्विभागादेकादिभिर्द्वादशपर्यन्तैरङ्कैर्दिनरात्र्योर्द्वादशापि होराः स्थाप्याः । एवं सौम्ययन्त्रे ऽक्षांशपक्षसाधनं तत्र निरक्षमेषादिलग्नानामिष्टभागानां स्थापनमाह ।

भचक्रपत्रेऽपि पुरेव कॢप्ते
वृत्तत्रयेऽभ्यन्तरतोऽष्टभागान्।
हित्वा कलाख्याब्धिगुणानथाच्चे
व्यासार्द्धमानेन विधाय वृत्ते ॥ १० ॥
मिरक्षमेषादिविलग्नभागान्
पूर्वादितान् प्राचि निवेश्य चैन्द्याः।
वृत्ते द्वितीये तदधो निवेश्या-
स्तदंशरेखा गणकैर्निजेष्टाः ॥ ११ ॥

अनयोर्व्याख्या कोष्ठकागारपत्रस्योपरि दृढतया सूत्रापिते भचक्रपत्रेऽपि पूर्ववद्दिक्साधनपूर्वं कर्कमेषमकरप्रमाणेन वृत्तत्रये रचिते सति अभ्यन्तरतो यन्त्रमध्याद्याम्यभागे रेखोपरि भचक्रकेन्द्रप्रमाणं ८।३४ मुक्त्वा तदन्ततो वृत्तव्यासार्द्धमानेन २१।२४ वृत्तं विधाय तदधो लग्नांशरेखास्थापनार्थं द्वितीयवृत्तं विधाय पूर्वादितान् निरक्षमेषादिलग्नभागानंशकला २७।५० इत्यादि रूपानैन्द्र्याः पूर्वभागान्निवेश्य तदधःस्थिते द्वितीयवृत्ते निजेष्टाः पूर्वोक्तयुक्त्या यद्विधयन्त्रोचिता एकाद्यास्तदंशरेखाः क्रमान्निवेश्या मेषादीनामंशादिमानं यथा

मेषे भागाः कलाश्चापि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिष्ण्यानि गगनेषवः २७।५० ।
वृषे नन्ददृशाब्ध्यक्षा २८।५४
युग्मे दन्ता षडिन्दवः ३२।१६॥ १२॥
व्युत्क्रमादेत एव स्युः कर्कसिंहाङ्गनास्वपि।
कन्यादिषट्कमानं स्यात्तुलादौ वैपरीत्यतः ॥ १३ ॥

अथ भचक्रे प्रागुक्तदृक्कर्मसंस्कृतनक्षत्रस्थापनमाह।

प्राग्व्याससूत्रेऽग्रमुखानि सन्ति
समानि लङ्कोदयजानि यत्र।
रेखा ध्रुवाणां प्रतिभागजाता-
स्तत्रैव केन्द्राभिमुखेन लेख्याः ॥ १४ ॥
केन्द्रात्प्रतीपं विरचय्य चिह्नं
सौम्यप्रमाणेन च कर्कटेन।
तत्रैव धिष्ण्यस्य यथोदितस्य
निवेश्यमस्याग्रमतीव सूक्ष्मम् ॥ १५ ॥

व्याख्या यत्र व्याससूत्रे पूर्वस्य अपररेखा निरक्षादि मेषादिलग्नानि सांशानि लिखितानि सन्ति तत्र पूर्वरेखामनु सरीकृत्य नक्षत्राणामंशप्रमाणेन केन्द्रात्प्रतीपं सौम्यसाधी रात्रप्रमाणेन चिह्नं विरचय्य तत्रैव चिह्नोपरि यथोद्दिष्टस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिष्ण्यस्य नामसहितस्यातिसूक्ष्मार्थं सुखं स्याप्यम्।

धनुर्मृगान्तर्निहितं विधेयं
चिन्हं प्रसिद्धं मकरस्य नाम्ना।
यद्भ्राम्यमाणं गणकेन विद्वन्
मुहुर्मुहुश्चुम्बति नाडिवृत्तम्॥ १६॥

स्पष्टं एवं सौम्ययन्त्रे भचक्रसाधनम्।

अथ केवलयाम्ययन्त्रेऽप्याशयविशेषमत्यन्तमाह।

याम्येऽपि यन्त्रे विधिरुक्त एव
व्यत्यास्य वृत्ते मृगकर्कसंज्ञे।
दिक्साधनापूर्वकमुन्नतांशान्
याम्येऽपि भागे विनिवेशयेच्च॥ १७॥
मध्याच्च सौम्ये विरचय्य केन्द्रं
व्यासार्धमानेन कुजं विदध्यात्।
भाभार्धकं दक्षिणतस्ततश्च
केन्द्राणि विस्तारयुतानि कुर्यात्॥ १८॥

अनयोर्व्याख्या याम्येऽपि यन्त्रे विधिर्वृत्तसाधनादिः प्रागुक्त एव अयं विशेषः मृगकर्कवृत्ते व्यत्यास्य मृगवृत्तस्थाने कर्कवृत्तमिति कर्कवृत्तस्थाने मृगवृत्तमिति च नाम कृत्वा दिक्साधनपूर्वकमुन्नतांशान् दक्षिणस्यां दिशि निवेशयेत् स्या-

For Private And Personal Use Only

पयेदित्यर्थः। तथा यन्त्रस्य मध्यादुत्तरस्यां दिशि प्रोक्तयाम्य-केन्द्रमानेन कर्कटेन चिन्हं कृत्वा उत्तरयाम्यव्यासार्द्धमानेन वृत्तं विदधीत। एवं भार्द्धं यावत् केन्द्रमानैर्व्यासमानैर्वा वृत्तकानि संसाध्यानि ततो भार्द्धाधिकत्वात् दक्षिणस्यां सविस्तराणि केन्द्राणि कुर्यात् केन्द्रमानैर्व्यासमानैर्वा वृत्तवलयानि संसाधयेदिति भावः। एवं केवलयाम्ययन्त्रेऽक्षांशपत्रसाधना सम्पूर्णा।

अथ केवलयाम्ययन्त्रे भचक्रपत्रसाधनमाह।

भचक्रपत्रेऽपि च याम्ययुक्त्या
कृतेषु वृत्तेष्वथ केन्द्रचिन्हात्।
व्यासाख्यवृत्ते विहिते कुबेर-
भागे निवेश्यानि पुरेव भानि॥ १९॥

व्याख्या। भचक्रे याम्याक्षांशपत्रवदुक्तकर्मकरवृत्तवैपरीत्येन वृत्तेषु विहितेषु दिक्साधनपूर्वं यन्त्रमध्यादुत्तरभागे भचक्रकेन्द्रमानेन ८।२४ चिन्हं कृत्वा तदुपरि व्यासार्द्धवृत्ते २१।१६ विहिते पूर्ववत् निरयणानि भानि मेषादीनि तथा भानि नक्षत्राणि पुरेव सौम्ययन्त्र इव याम्यस्वाहोरात्रमानेन प्रकटीकृतसुखानि साध्यानि सौम्ययन्त्रे सौम्यस्वाहोरात्रयुक्तानि लिख्यन्ते। अत्र च याम्ययन्त्रे याम्यस्वाहोरात्रयुक्तानीति भावः।

अथ मिश्रभेदेषु फणीन्द्रयन्त्रे ऽक्षांशपत्रे उन्नतवलयसाधनमाह ।

तन्मिश्रभेदेषु फणीन्द्रयन्त्रे
वृत्तत्रयं सौम्यवदेव कार्यम् ।
कर्कान्ततः खाग्निलवैर्विभज्य
वृत्तद्वयं याम्यवदेव शेषम् ॥ २० ॥

अस्य व्याख्या तन्मिश्रभेदेषु सौम्ययाम्यात्मकयन्त्रभेदेषु फणीन्द्रयन्त्रे उन्नतांशपत्रे सौम्ययन्त्र इव वृत्तत्रयं मकरमेषकर्काख्यं कार्यं ततः कर्कवृत्तमेव १२।५१ कृत्वा खाग्निलवैर्विभज्य याम्ययन्त्र इव शेषं वृत्तद्वयं मेषमकराख्यं आमध्यं कार्यम् । एतावता मध्यात् क्रमेण वृत्तपञ्चकं मकरमेषकर्कमेषमकराख्यं समुत्पन्नम् । अत्र को भावः सौम्यध्रुवात् कर्क आसन्नः मध्ये मेषः बहिर्मकरः ततः सौम्ययन्त्रे कर्कवृत्तमादौ तथा याम्यध्रुवान्मकरो निकटः मध्ये मेषः कर्को बहिः । ततो याम्ययन्त्रे मकरवृत्तमादौ इदं तद्द्वयात्मकमिति तथैव वृत्तरचनोक्ता ।

अथ फणीन्द्रयन्त्रे ऽक्षांशपत्रे उन्नतवलयसाधनमाह ।

कर्कस्य वृत्तादुपरि प्रसाध्य
सौम्योक्तयुक्त्योन्नतमण्डलानि ।
याम्यानि कुर्यात्तदधः स्थितानि
संप्राप्तशुद्धानि हि याम्यभागे ॥ २१ ॥

अस्य व्याख्या मकाशयन्त्रे पूर्वंवद्दिक्साधनं कृत्वा या-म्यदिग्भागे कर्कवृत्तादुपरि मकरवृत्तपर्यन्तं सौम्य इवोन्नत-मण्डलानि प्रसाध्य कर्कादधो याम्य इव मिलितान्युन्नत-मण्डलानि कार्याणि । एवं फणीन्द्रयन्त्रे प्रकाशयन्त्रसाधना सम्पूर्णा ।

अथ फणीन्द्रयन्त्रे भमण्डलसाधनम् ।

प्राग्वद्भपीठेऽस्य च पञ्चवृत्ते

मेषादिषट्कं विनिवेश्य सौम्ये ।

याम्येऽथ भागे विनिवेशनीयं

प्राक्पश्चिमान्ते तु तुलादिषट्कम् ॥ २२ ॥

अस्य व्याख्या अस्य फणीन्द्रयन्त्राख्यमिश्रयन्त्रस्य अपचे प्राग्वत्प्रकाशयन्त्रवत् सपञ्चवृत्ते रचितपञ्चवृत्तके सौम्ययन्त्र-वत् मध्यात् याम्यरेखोपरि बृहत्केन्द्रांशैः ८।२४ सौम्यदि-ग्भागे प्राक्पश्चिमरेखालग्नं व्यासवृत्तं विरचय्य तत्र मेषा-दिराशिषट्कं निवेश्य च ततो याम्ययन्त्रवन्मध्यात् सौम्यरे-खोपरि लघुकेन्द्रांशैः ८।२४ याम्यदिग्भागे पश्चिमपूर्वरेखा लग्नं व्यासवृत्तं विरचय्य तुलादिषट्कं निवेशनीयम् ।

अथास्मिन्यन्त्रे भमण्डलांशैर्लग्नज्ञापनमाह ।

सौम्यानि भानीह कुलीरचापौ

लेख्यानि सौम्यद्युगुणोदितानि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याम्यानि चैतानि कुलीरमध्ये
शेषाणि याम्यद्युगुणोदितानि ॥ २३ ॥

अस्य व्याख्या इह पूर्वोदिते फणीन्द्रयन्त्रे भचक्रपत्रे सौम्यानि भानि सौम्यद्युगुणोदितानि प्रोक्तसौम्यस्वाहोरात्रान्वितानि कर्कटस्तात् वाच्ये याम्यकरात्सौम्ययन्त्रवद्विलेख्यानि।

अथ भचक्रपत्रस्य घटनविधामाह ।

आधारवृत्तं परिरक्षणीयं
यन्त्रे भचक्रार्थमपास्य शेषम् ।
फणीन्द्रयन्त्रं गदितं मयैतत्
ज्ञेयानि यन्त्राण्यखिलान्यपीत्थम् ॥२४॥

अस्य व्याख्या भचक्रपत्रे शेषपत्रमपास्य छित्वा राशिनक्षत्रलिखितेहैतोराधारवृत्तं परिरक्षणीयं शेषं स्पष्टम् । एवं फणीन्द्रयन्त्रे भचक्रपत्रसाधना सम्पूर्णा जाता ।

अथ किमपि प्रस्तुतं सविशेषमुच्यते ।

केन्द्रव्यासेभ्यो यानि उन्नतवलयानि संपादितानि सन्ति तानि केवलसौम्ये केवलयाम्ये मिश्रे च सर्वदा याम्यभागे एव भवन्ति । तथा केवलयाम्ययन्त्रादपि सौम्ययन्त्रादपि सौम्ययन्त्रवद्घटिकादिकालनियमोऽचोदिष्टभागस्थानेषु सर्वदा सौम्यदिग्विभागे तुल्यमेवायाति । परं यन्त्रविद्भिर्लङ्काभिधनिरक्षस्थानादुत्तरं ध्रुवाभिमुखं स्वस्वकेन्द्रव्यासेभ्यः साधितसौम्योन्नतवलयैः सौम्यनक्षत्रसहितैः सौम्यनक्षत्रसा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धनचक्रैः याम्ययन्त्रसाधना तथाविधा नाकारि । तत्र कौ-
तुः । ततः याम्यभीष्टज्यासैर्दीर्घतरैः साधितयाम्योन्नतमण्ड-
लानि भृशं दुर्घटानि पृथुलप्रमाणत्वात् बहुविस्तराणि । अत
एव साधयितुमशक्यानि तथा तद्दिक्सम्बन्धीनि नक्षत्राण्यपि
स्तोकतराणि निरुपयोगीनि च । अतस्तैस्तत्राडीचक्रे तत-
द्याम्ययन्त्रं विहाय सौम्ययन्त्राङ्गीकारः कृतः । तद्वात उत्तर-
ध्रुवाभिमुखं परमक्रान्तिपर्यन्तं अस्मादेवसौम्ययन्त्रात् घ-
टिकादिकालनियमः सुखोपलभ्यः सुखावबोधश्च प्रमाणी-
कृतः । तथा तैरेव गणकार्यवरैर्गणितज्ञानं कौतुकार्थं सौ-
म्ययाम्योद्भवेन गणितागमेन उभयोः सौम्ययाम्यगणितयोर्मु-
ख्याऽनेकानि मिश्रयन्त्राणि तथा तथा चक्रिरे यथा यथा
तयोः सौम्ययाम्ययन्त्रयोः सौम्ययाम्यविभागे लक्षाणस्थाने
घटिकादिसमयज्ञाने एभ्यो मिश्रयन्त्रेभ्य एव सर्वदा सत्वर-
मायाति विशेषश्चायं यतः फणीन्द्राभिधे मिश्रयन्त्रे वृत्तपञ्च-
कत्वात्सौम्ययाम्योद्भवेन गणितेन उन्नतमण्डलेष्वत: संपात-
शुद्धिः स्यात् । परमन्तेषु मिश्रयन्त्रेषु वृत्तत्रयसत्वात्तेनैव ग-
णितेन उन्नतमण्डलानि पृथग् ज्ञायन्ते । अतस्तेषु सम्पात-
शुद्धिर्न जातेति ।

For Private And Personal Use Only

अक्षांशेभ्यः परमदिनानयनम्।

द्विःस्थाक्षांशा जिनै२४र्भक्ता लब्धमक्षाद्विशोधितम्।
शेषमर्द्धं हतं दिग्भिः षष्ट्याप्तं द्विगुणीकृतम् ॥ २५॥
नाडिकाविनाड्यादि ऊर्ध्वाङ्के त्रिंशता युतम्।
नृयुग्मान्ते रवौ प्रोक्तं पलेभ्यः परमं दिनम् ॥ २६ ॥

उदाहरणेनैव व्याख्या ज्ञेया तद्यथा द्विस्थाक्षांशाः २८।२९ द्विःस्थाः २८।२९ चतुर्विंशतिभिर्भक्तालब्धं १।११।२८ अक्षांशेभ्यः शोधितं शेषं २७।२७। २२ अर्द्धितं १३।४३।४१ दशगुणं १३७।१७ षष्ट्या ६० भक्तं २।१७।१७ द्विगुणितं ४।३४।३४

---

* अत्रोपपत्तिः।

श्रीग्रहलाघवकारोक्ताक्षकर्णस्थूलपलभायाः कल्पितस्वल्प-स्वीकृतस्य विलोमविधानेन पलभा $= \frac{अ}{५} + \frac{अ^{२}}{१२५०}$ वा पलभा $= \frac{अ}{५}$ एतादृशपलभासम्बन्धि परमचरपलयोर्विंशतिमितं प्रकल्प्य पलभा तेन गुणिता परमचरं पलात्मकं

$$= \frac{२३\ अ}{५} = \frac{१०}{२}\left(\frac{२३\ अ \times २}{५ \times १०}\right) = \frac{१०}{२}\left(\frac{२३\ अ}{२५}\right)$$

$$= \frac{१०}{२}\left(\frac{२३\ अ}{२४}\right)$$ स्वल्पान्तरात् $= \frac{१०}{२}\left(अ - \frac{अ}{२४}\right)$ इदं घट्यर्थं षष्टि भक्तं तद्द्विगुणं दिनमानार्थं त्रिंशद्युतं तेन सर्वमुपपन्नम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपरि त्रिंशद्भि ३० र्युतं दिग्धो परमदिनं चत्वादि २४।२४।२४ एवं त्रिंशद्भागाम् यावद्यायाति अधतोऽधतोऽन्तरं करोति एवं सर्वत्र ।

अथ परमदिनाद्विषुवच्छायानयनमाह ।

*हीनं खरामैः ३० परमं दिनं च
शेषं नगघ्नं गुणितं च षष्ट्या ६० ।
भक्तं त्रिगोबाहुभि २९३ रङ्गुलादि-
छाया स्फुटा स्याद्विषुवद्दयस्य ॥ २७ ॥

अस्य व्याख्या स्पष्टार्थत्वनैव ज्ञेया यथा परमदिनं ३४।३४।३४ खरामै ३० र्हीनं शेषं ४।३४।३४ नगगुणं ३१।११५८ षष्टापिण्डः १८२१।५८ कल्पितभागहारा २९३ ग्रं विषुवच्छाया ६।२२ कलापिण्डशेषं २१९ अनया युक्त्या छायानयनं कार्यम् ।

अभूद्भृगुपुरे वरे गणकचक्रचूडामणिः
कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः ।

* अत्रोपपत्तिः ।

अत्र दिङ्नागसन्त्यंगगुणयोगेन विषुवती गुणिता परमं पलात्मकचरं = २१ वि $= \frac{शे \times ६०}{२}$ अतः

वि $= \frac{शे \times ६०}{४२} = \frac{७ शे \times ६०}{२९४} = \frac{७ शे \times ६०}{२९३}$ स्वल्पान्तरात्

ततश्चपपन्नम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदीयपदशालिना विरचिते सुयन्त्रागमे
महेन्द्रगुरुणोदितं रचनकर्म जातं स्फुटम् ॥ २८ ॥

श्रीफिरोजनृपेन्द्रसर्वगणक: शिष्टो महेन्द्रप्रभु-
र्जात: सूरिवरस्तदीयचरणाम्भोजैकभृङ्गच्युत:।
सूरिश्रीमलयेन्दुना विरचिते सद्युक्तियन्त्रागम-
व्याख्याने रचनाभिधेऽतिविशदोऽध्यायस्तृतीयो गत: ॥

इति यन्त्रराजागमे यन्त्ररचनाध्याय: समाप्त:।

अथ यन्त्रशोधनाध्यायो व्याख्यायते।

निष्पन्नयन्त्रमुल्लंघ्य रंध्रे कीलं प्रवेशयेत्।
तदग्रे लम्बयेत्सूत्रं सूक्ष्मं भारेण संयुतम् ॥१॥
मध्यरेखां स्पृशेत्तच्चेज्ज्ञेयं शुद्धं तदा स्फुटम्।
अन्यथाधिकमस्याङ्गं घर्षित्वा शोधयेत्तत: ॥२॥

अनयोर्व्याख्या निष्पन्नं यन्त्रमुल्लंघ्य तत्किरीटच्छिद्रे लोह-
मयं कीलं प्रवेशयेत् तदग्रे भारेण संयुतं सूक्ष्मसूत्रं लम्बयेत्।
लम्बमानं कुर्यादित्यर्थ:। लम्बमानं सूत्रं यन्त्रस्य मध्यरेखामा-
यान्तं स्पृशेत् तदा तद्यन्त्रं शुद्धमिति सम्यक्तो भारशुद्धं ज्ञे-
यमित्यर्थ: अन्यथा अशुद्धं यदि स्यात्तदास्य यन्त्रस्य वामं
दक्षिणं वाधिकमङ्गं घर्षयित्वा पुन: शोधयेत् सूत्रस्पर्शेनेति-
शेष:।

For Private And Personal Use Only

अथ कुजकोन्नतवृत्तानां शोधनमाह ।

मेषद्युजीवाप्राग्रेखायोगः स्पर्शात्कुजः स्फुटे ।
केन्द्रव्यासान्तरैः शुद्धैः शोधयेदुन्नतांशकान् ॥ ३ ॥

अस्य व्याख्या मेषद्युजीवाप्राग्रेखयोर्योगः सन्निपातः उभयतस्तयोः स्पर्शात्कुजाख्यवृत्ते स्फुटे भवतः । तथा पूर्वोक्तैः केन्द्रव्यासान्तरैरुन्नतांशानर्थादुन्नतवृत्तानि शोधयेत् शुद्धानि कुर्यादित्यर्थः । उदाहरणं यथा मध्यात् षडुन्नतांशानां केन्द्रप्रमाणेन २८।३२ चिह्नं कृत्वा तदुपरि व्यासमानेन ३१।२८ वृत्ते षडुन्नतांशानां वलयं लिख्यते ततो यन्त्रमध्यात् मध्यरेखोपरि उन्नतवलयं यावत्केन्द्रव्यासान्तरं ३।५६ लब्धाग्रभागैः प्रतीयमानं यदि स्यात्तदा तद्वलयं शुद्धम् । एवं शेषाण्युन्नतवलयानि शोध्यानि ।

अथांशानां शुद्धलग्नानां शोधनमाह ।

उदयास्तोदीच्ययाम्यरेखाग्रे सदृशांशता ।
प्राक्सप्ततुर्यदिक्संस्थालग्नानां लग्नशुद्धता ॥४॥

अस्य व्याख्या उदये पूर्वक्षितिजे अस्ते अपरक्षितिजे उदीच्यरेखाग्रे याम्यरेखाग्रे च प्रथमसप्तमचतुर्थदशमानां मेषतुलाकर्कमकराणां सदृशांशता तुल्यांशता यदि स्यात् तदा तेषां चतुर्णां लग्नानां शुद्धता ज्ञेया तद्वैपरीत्येऽशुद्धता च एवं शेषाण्यपि लग्नान्यंशैः शोधनीयानि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ हस्तमध्यस्थापितनक्षत्रांशात् परमोच्चतांशे-
र्नक्षत्रचतुष्कशोधनमाह ।

मध्यरेखास्थिते स्वस्वराश्यंशे संस्पृशेद्यदि ।
भांस्यं स्यात् परमांशांश्च तदा तच्चतुष्शुद्धता ॥५॥

अस्य व्याख्या यद्यन्नक्षत्रं यस्य यस्य राशेर्यस्मिन् भागेऽस्ति तस्मिन्भागे मध्यरेखोपरि स्थिते सति तस्य तस्य नक्षत्रस्य चतुस्थानं स्वात्परमांशात् परमोच्चतांशान् यदि स्पृशति तदा तस्य नक्षत्रस्याचशुद्धिः स्यात् । तदभावे चक्षोर्निर्दिष्टिवी कार्येति शेषः । यथा शुद्धं रोहिणीनक्षत्रं मिथुनस्य तृतीयांशे वर्त्तते तस्मिन्नंशे मध्यरेखोपरि स्थापिते रोहिण्याख्यं यदि स्वीयात्परमोच्चतांशात् ७० स्पृशति तदा रोहिण्यास्यशुद्धिर्भवति । एवं शेषाणि नक्षत्राणि शोधनीयानि।

अथ यन्त्रपृष्ठस्थितभुजांशशोधनं पादद्वयशोधनं चाह ।

भुजाग्रयुग्मं शुद्धं स्याद्रेखास्थं परपूर्वयोः ।
तन्मध्यरेखोपरिगं शुद्धं पादद्वयं तथा ॥ ६ ॥

अस्य व्याख्या यन्त्रपृष्ठे भुजाग्रयुग्मं पूर्वापररेखोपरिगं यदि स्यात् तदा भुजाग्रं शुद्धं तथा पादद्वयं तस्या भुजाया मध्यरेखोपरि स्थितं शुद्धं भवति ।

अभूद्भृगुपुरे वरे गणकचक्रचूडामणिः
कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदीयपदशालिना विरचिते सुयन्त्रागमे

महेन्द्रगुरुणोदितं निखिलयन्त्रसंशोधनम् ॥ ७ ॥

श्रीपेरोजनृपेन्द्रसर्वगणकः पृष्टो महेन्द्रप्रभु-

र्जातः सूरिवरस्तदीयचरणाम्भोजैकभृङ्गयुता ।

सूरिश्रीमलयेन्दुना विरचिते सद्युक्तियन्त्रागम-

व्याख्यानेऽखिलयन्त्रशोधनमयोऽध्यायश्चतुर्थोऽगमत् ॥

इति यन्त्रराजागमे यन्त्रशोधनाध्यायश्चतुर्थः ।

अथ यन्त्रविचारणाध्यायो व्याख्यायते ।

अथ रवेः शेषग्रहाणां नक्षत्राणां चोन्नतांशानयनमाह ।

करेऽपसव्ये विनिवेश्य यन्त्रं

ज्योतिर्विदा भास्करसंमुखेन ।

तथा भुजाग्रं परिचालनीयं

यथा विशेच्छिद्रयुगेऽर्कतेजः ॥ १ ॥

अस्य व्याख्या अपसव्ये दक्षिणे यथा छिद्रयुगे इति

भुजापादसब्दे शेषं स्पष्टम् ।

पूर्वेऽह्नि प्राक्ककुभो भुजाग्रे

स्पष्टं रवेरुन्नतभागकाः स्युः ।

तद्देव मध्यं दिनतोऽपराशा

रात्रौ ग्रहेष्वपि चैवमेव ॥ २ ॥

For Private And Personal Use Only

अस्य व्याख्या पूर्वेऽहनि पूर्वाह्णे प्राक्कुभः पूर्वस्याः दिशः भुजाग्रस्पृष्टा यकाभ्या भवतिपर्यन्ता रवेरुन्नतभागाः स्युः भवेयुः । त एव मध्यं दिनतो मध्याह्नादूर्ध्वमपरोन्नतांशाः स्युः तथा गणकेन दक्षिणनेत्रं निमील्य वामनेत्रोपरिस्थेन यन्त्रेण दृष्टस्य सूर्यबिम्बस्य धिष्ण्यस्य वा वेधे भुजाग्रस्पृष्टा अंशाः पूर्वापरदिग्गतत्वेन पूर्वोन्नतांशाः अपरोन्नतांशा ज्ञेयाः ।

अथ रविसमक्षपूर्वापरोन्नतांशेभ्यो दिनगतशेषघटिकाद्यानयनं लग्नानयनं चाह ।

रव्यंशकं प्रागपरे च भूजे
धृत्वोन्नतांशोपरिगे कलेऽस्मिन् ।
द्विःस्थानसंलग्नखगास्यमध्ये
कालांशकैः षड्गुणैः१० पलप्रमाणैः ॥ ३ ॥
षड्भिर्हृतैः भुक्तं दिवसस्य यातं
शेषं च घट्यादि परिस्फुटं स्यात् ।
तत्रोन्नतांशस्पृशि भास्करांशे
प्राग्भूजगः सायनलग्नभागः ॥ ४ ॥

अनयोर्व्याख्या इष्टदिने सायनमेषादिराशिस्थितसूर्यांशं पूर्वाह्णे प्राग्भुजेऽपराह्णेऽपरभुजे च धृत्वाऽस्मिन्नेव सूर्यांशे क्रमाद्दिवपूर्वापरोन्नतांशोपरिगे जाते सति क्रमात् द्विःस्था-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नतांशतुल्यमृगास्यमध्यस्थितैः कालांशैरिष्टपलप्रभावे: यद्भिर्दि-
भक्तैर्दिनयातीतं धिष्ण्यं च घट्यादि यथास्फुटं स्पष्टं स्यात् ।

अथ दिवाहोरानयनम् ।

सूर्यं रवेः सप्तमराशिभागो-
यथैव होरावलयेऽस्ति सैव ।
होराद्युनाथाश्च ततः स्वषष्ठ-
षष्ठस्य गत्या परभूजलस्थात् ॥ ५ ॥

अस्य व्याख्या एवमिति कोऽर्थः पूर्वपक्षास्तराशौ रवेरुन्नतांशोपरि स्थापिते सति तस्मात्सप्तमराश्यंशो यस्मिन् होरावलयेऽस्ति सैव तद्दिने आद्या दिनवारहोरा ज्ञेया दिनवारहोरातः षष्ठषष्ठस्य द्वितीयाद्या द्वादशपर्यन्ता होरा ज्ञेया परमियं होरा अपरभूजलस्थात् ज्ञेया ।

अथ दिनगतघटीभ्यो रव्युन्नतांशानयनम् ।

रव्यंशकं प्राक्क्षितिजे निवेश्य
चिन्हं मृगास्ये विरचय्य पश्चात् ।
अभीष्टकाले घटिकोपरिस्थं
तदेव कृत्वा परिचिन्तनीयम् ॥ ६ ॥
रव्यंशको यत्र हि तुर्यसूत्रे
तदंशसंख्यास्तपनोन्नतांशाः ।

For Private And Personal Use Only

मध्याह्नतोऽस्तमितिजास्तथैव
ते बोधनीयाः सुधियावशिष्टाः ॥ ७ ॥

अनयोर्व्याख्या रव्यंशकं प्राक्क्षितिजे निवेश्य मृगास्ये चिह्नं विरच्य पश्चादभीष्टकालघटिकोपरिस्थं तदेव मृगास्यं कृत्वा यथकेन विलोकनीयं तस्मिन् तुङ्गहृते रव्यंशः स्थितो भवति तावद्भ्रमणाः पूर्वतः सूर्योन्नतांशास्तावतीषु घटीषु भवन्तीति शेषः । तथा मध्याह्नतोऽस्तमितिजास्तथैव पूर्वोक्तरीत्या सुधिया विदुषा अवशिष्टास्विष्टघटीषु अवशिष्टास्ते उन्नतांशा बोधनीयाः ।

अथ रात्रौ नक्षत्रविलोकनतांशेभ्यो रात्रिगतशेषघटिकानयनम् ।

विलोकितांशोपगतेष्टभास्थे
रव्यंशकेऽस्तेन्द्रकुजस्थिते च ।
चिह्नद्वयान्तर्गतशेषनाडी-
पलादि पूर्वापररात्रिभागे ॥ ८ ॥

अस्य व्याख्या रात्रौ भुजायेष्टनक्षत्रे विद्धे प्राच्याः प्रतीच्या वा ये उन्नतांशाः प्राप्यन्ते तेषून्नतवलयस्थितेषु विलोकितांशेषु विद्धनक्षत्रधृते मुखे सति सूर्यांशेऽस्तकुजस्थे ऐन्द्रकुजस्थे च पूर्वापररात्रिविभागे क्रमाच्चक्रमुखचिह्नद्वयान्तर्गतं शेषं नाडीपलादि स्फुटं स्यात् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ रात्रौ लग्नहोरानयनम् ।

तत्रैव नक्षत्रमुखे निविष्टे
प्राग्भूजगं सायनमेति लग्नम् ।
सूर्यांशकाधिष्ठितवृत्तसंख्या
तदा च होरापि निशि स्फुटा स्यात् ॥ ९ ॥

अस्य व्याख्या तत्रैव विश्लेषितांशेष्वेवं विदनयन्त्रमुखे निविष्टे पूर्वरात्रेऽपररात्रे च प्राग्भूजगं सायनलग्नमेति तथा तदा तस्मिन् लग्नकाले यस्मिन् वलये सूर्यांशः स्थितोऽस्ति तेन तद्वृत्ता होरा भवतीत्यर्थः ।

अथ रात्रिगतघटीभ्यो नक्षत्राक्रान्तोन्नतांशानयनम् ।

सूर्यांशकेऽस्तक्षितिजस्थितेऽङ्कं
कृत्वा मृगास्ये गतनाडिकासु ।
निवेशिते चोन्नतवृत्तगाः स्युः
प्राच्यप्रतीच्योड्डभवोन्नतांशाः ॥ १० ॥

अस्य व्याख्या सूर्यांशकेऽस्तक्षितिजस्थिते सति मृगास्ये अङ्कं कृत्वा पश्चाद्गतेष्टनाडिकासु अत्र मृगास्ये निवेशिते सत्युन्नतांशवृत्तस्थिताः स्वकीयाः प्राच्यप्रतीच्योड्डभवाः पूर्वापरकपालस्थितनक्षत्राक्रान्ता उन्नतांशाः स्फुटा भवन्तीति शेषः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ दिनगतरात्रिगतघटीभ्यो लग्नानयनम्।

प्रागस्तभूजोपगतेऽर्कभागे-
ऽङ्किते मृगाख्ये गतनाडिकासु।
स्थिते च तस्मिन् द्युनिशोः क्रमात् स्या-
त्प्राग्भूजगः सायनलग्नभागः ॥ ११ ॥

दिवसे सूर्यांशे प्राक्क्षितिजोपगते मृगाख्ये चिह्निते ततो गतनाडिकासु तस्मिन्मृगाख्ये स्थिते सति प्राक्क्षितिजस्थितः सायनलग्नभागः स्यात्। एवं रात्रावस्तक्षितिजे स्थिते सूर्यांशे मृगाख्यं चिह्नयित्वा ततो रात्रिगतघटीषु मृगाख्ये आरोपिते प्राक्क्षितिजगतः सायनो लग्नभागो भवति।

अथ द्वादशभावसाधने भावचतुष्टयसाधनमाह।

पूर्वास्तभूखोत्तरदक्षिणासु
प्राक्सप्ततुर्याम्बरलग्नभागाः।
स्युः भवेत्केन्द्रचतुष्कमिष्टे
यत्र स्थिताः स्युर्बलिनो ग्रहेन्द्राः ॥ १२ ॥

अथ व्याख्या इष्टे तात्कालिके लग्ने पूर्वभूजास्तभूखोत्तरदक्षिणासु समकालं संभवन्तः प्राक्सप्ततुर्याम्बरलग्नभागाः प्रथमसप्तमचतुर्थदशमलग्नांशाः केन्द्रचतुष्कं भवेत्। यत्र केन्द्रचतुष्के स्थिता ग्रहेन्द्रा बलिनः स्युः भवेयुरिति।

For Private And Personal Use Only

पुनर्भावचतुष्टयोत्पादनमाह ।

अङ्केशहोरायुजि लग्नभागे
खमध्यगौ नैधनधर्मभावौ ।
द्वितुर्यहोरास्पृशि सप्तमांशे
खमध्यगावेव शिवार्कसंख्यौ ॥ १३ ॥

लग्नभागे तात्कालिके लग्नांशेऽस्मिन् ८।११ होरायुजि नवमैकादश ८।११ होरावलयाद्यभागस्थिते सति खमध्यगौ याम्योत्तररेखोपरिगतौ क्रमान्नैधनधर्मभावौ भवतः । तथा सप्तमांशे तत्स्थितसप्तमलग्नांशे द्वितीयचतुर्थहोराभागरेखास्पृशि पूर्ववत् खमध्यगावेव एकादशद्वादशभावौ स्तः ।

अथैतेभ्यः शेषभावचतुष्टयोत्पादनमाह ।

वस्वादिभावा रसराशियुक्ता
निजानुजात्मक्षतसमाः स्युः ।
संयोज्य भावद्वितयं समीप-
स्थितं तदर्धं विदितं च सन्धिः ॥ १४ ॥

अस्य व्याख्या वस्वादिभावा अष्टमनवमैकादशद्वादशभावा रसराशियुक्ता राशिषट्कयुक्ता निजानुजात्मक्षतसमाः स्युः भवेयुः यथा अष्टमनवमैकादशद्वादशभावानां राशिषट्कयोजनात् द्वादशपातनात् शेषा द्वितीयतृतीयपञ्चमषष्ठभावा भवेयुः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ सन्धेरानयनं भावयोगदलं सन्धिरिति वचनात् द्वादशप्रथमयोर्योगः एकत्र मेलनं पश्चाद्दलं यद्दं प्रथमसन्धिः । एवं प्रथमद्वितीययोर्योगदलं लग्नसन्धिः । द्वितीयतृतीयभावयोर्मेलने धर्दीकृते द्वितीयसन्धिः एवं शेषा अपि सन्धयः उत्पादनीयाः ।

पूर्णं च मिश्रं च फलं ग्रहेन्द्रः
समांशके यच्छति भावसन्ध्योः ।
हीनोऽधिको वा कथितः स सन्धे-
रतीतभावैक्यफलप्रदाता ॥ १५ ॥

अथ व्याख्या भावसन्ध्योः समांशकी ग्रहेन्द्रः पूर्णं मिश्रं च फलं यच्छति कोऽर्थः भावसमांशको ग्रहः पूर्णं फलं सन्धिसमांशकस्तु मिश्रं फलं ददाति तथा एव ग्रहेन्द्रः सन्धेर्हीनांशकः समतीतभावस्य फलदायी सन्धेरधिकांशकस्तु आगामिभावस्य फलदायी भवति ।

अथ खेटस्य सन्धेः सकाशान्न्यूनाधिकत्वे विंशोपकाफलानयनमाह ।

न्यूनाधिकत्वे विधिरेष कार्यः
खेटांशसन्ध्यन्तरयातशेषम् ।
हत्वा भजेत् २० भावजसन्धिजांशा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्तरेण भक्तं परिलभ्यते यत् ॥ १६ ॥
तस्याद् द्विधा भावफलं ग्रहस्य
प्रहीयमानं परिवर्द्धमानम् ।
इदं सदा यच्छति च ग्रहेभ्यो-
यदा भवेत्कालगवत्तगश्च ॥ १७ ॥

अनयोर्व्याख्या सर्वैः सकाशात् ग्रहस्य न्यूनाधिकत्वे एष विधिः कार्यः। कोऽर्थः खेटांशमध्यमान्तरयोः पाते सति यच्छेषं प्रलभ्यते २० विंशत्या हत्वा भावजसन्निकांशान्तरेण भक्तं यत्फलं लभ्यते तत् ग्रहस्य द्विधा हीयमानवर्द्धमानभेदाद्भावफलं भवेत् । इदं फलं ग्रहेभ्यस्तदा यच्छति यदा कालचक्रगो भवति ।

अथ यन्त्रेण पङ्क्तिभक्तांशरेखोपगतं मध्यस्पष्टांशज्ञानमाह

आद्यन्तरेखे रसभागजाते
धृत्वा कुजे प्राचि मृगोऽङ्किते द्विः ।
अंशान् द्विचिन्हान्तरजान्विभज्य
पङ्क्तिर्विलभ्याश्च पदङ्कनीयाः ॥ १८ ॥
ततोऽङ्कतः प्राक् च नतांशकेषु
सूत्रा मृगास्ये निहितेऽनुपत्तम् ।
प्राच्यां कुजे सूर्यलवः स्फुटः स्यात्

For Private And Personal Use Only

शेषेषु खेटेष्वपि चेत्थमेव ॥ १९ ॥

अनयोर्व्याख्या। यस्य ग्रहस्य भमध्यान्तरसभागजाते यष्टिप्रमिते आद्यन्तरेखे प्राचि भुजे धृत्वा मृगास्ये स्थानद्वयस्थे चिह्नद्वयं कृत्वा तदन्तरगान् अंशान् षड्भिर्विभज्य लब्धांशाः षड्गुणाः कार्याः ततः प्राक्कृतात् मृगास्यचिह्नात् स्पृष्टांशेषु मृगाननेऽनुचरं निवेशिते सति प्राकृते सौरे ग्रहः स्फुटो भवति एवमन्येष्वपि खेटेषु चिन्तनीयम्।

अथ षड्भिर्भतोन्नतद्युसमध्यगतोन्नतांशस्थानज्ञानार्थमाह।

षडुन्नतांशेषु मुखे तथान्ते

द्व्यंशमाधाय मृगोऽङ्किते द्विः ।

षड्भिर्हि चिह्नस्य तथा विभज्य

लब्धेषु भागेषु कृतेषु षोढा ॥ २० ॥

पूर्वोक्तरीत्यांशधृते मृगास्ये

प्रत्युन्नतांशं रविभागयोग्यम् ।

स्थानं भवत्युन्नतभागकाना-

मेवं विधेयं निशि चान्यभानाम् ॥ २१॥

अनयोर्व्याख्या। यथांशषट्के षडुन्नतांशेष्वादावन्ते च सूर्यांशं निवेश्य मृगास्ये स्थानद्वयेऽपि चिह्निते सति तदन्तरस्थानंशान् षड्भिर्विभज्य लब्धांशेषु षोढा स्थापितेषु प्रागुक्तरीत्या

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृगमुखेऽंशेषु स्थापिते मध्युन्नतांशं रव्यंशभोग्यमुन्नतांशानां स्थानं भवति एवमन्येषामपि भानामुन्नतांशाः समानेयाः कोऽर्थः यथा रव्यंशतः उन्नतांशज्ञानमुक्तं तथा नक्षत्रमध्युतः तदुन्नतांशज्ञानं विधेयम् ।

अथ रात्रेर्यामचतुष्टयलग्ननक्षत्रोन्नतांशज्ञानमाह ।

तृतीयहोरान्तगतेऽर्कभागे
यामोऽग्रिमः प्राक्कुजगं विलग्नम् ।
रात्रौ भवेदुन्नतवृत्तमध्ये
धिष्ण्याग्रिमाश्चोन्नतभागकाः स्युः ॥ २२ ॥
एवं षडङ्कान्तिमहोरिकासु
न्यस्तेऽर्कभागे सति शेषयामाः ।
लग्नानि धिष्ण्योन्नतभागकाश्च
विवेचनीया गणकैः स्वबुद्ध्या ॥ २३ ॥

अनयोर्व्याख्या अथ रात्रावस्तं गते कुजेऽर्कभागान्निवेश्य मकरमुखे चिन्हे कलाऽवपनस्थहोरावलयानां मध्ये तृतीय होराप्रान्तेऽर्कभागे स्थापिते पुनर्मृगास्ये चिन्हे तदुभयान्तरे कालवृत्ते घटीपलात्मकः प्रथमयामो भवेत् तथैव समकालं प्राक्कुजे लग्नं भागाद्यं स्यात् उन्नतवलयमध्ये धिष्ण्यचतुर्गता उन्नतभागा अपि स्युः । एवं षष्ठनवमहोराप्रान्ते रव्यंशे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमेण स्थापिते शेषं याममयं लग्नानि नक्षत्राणामुन्नतभागाश्च गणकैः सुधिया विचार्याः ।

अथ रविस्पष्टीकरणमाह ।

मध्योन्नतांशास्तपनस्य विद्ध्वा
ते मध्यरेखोपरि चिन्हनीयाः ।
सम्यक्तदूर्ध्वं स्थितभांशको यः
स सायनार्कश्च सदा स्फुटः स्यात् ॥ २४ ॥

अस्य व्याख्या रवेर्मध्याह्नसम्बन्धिन उन्नतांशान् यन्त्रेण विध्वा मध्याह्नरेखोपरि तत्प्रमितोन्नतांशेषु चिन्हे कृते भचक्रे भ्राम्यमाणे यो राशिभागस्तत्र निविशति तस्मिन्दिने तदंशः सायनार्कस्य स्फुटो भवति। अथोदाहरणम्। इष्टदिने मध्याह्नसमये यन्त्रेण मध्याह्नसमयस्योन्नतांशाः प्राप्ताः ६८ तत्र मध्याह्नरेखोपरि चिन्हे कृते तदनुभचक्रे भ्राम्यमाणे तदुपरि मेषराशेर्दशांशः सायनो लग्नः। अतो ज्ञातमिष्टदिने रविर्मेषराशेर्दशमे भागे सायनः वर्त्तते अयनांशैर्विहीनो निरयणो भवति।

अथ भिन्नांशग्रहाणां स्पष्टीकरणमाह ।

रात्रौ खमध्यस्थितभग्रहाणां
परोन्नतांशाव्यधचिन्हनाभ्याम् ।
मध्यस्थरेखोपरि भांशका ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र स्थितास्ते निखिलाः स्फुटाः स्युः ॥ २५ ॥

अस्य व्याख्या रात्रिसमये आकाशमध्यस्थितनक्षत्रग्रहाणां परोन्नतांशान्यन्त्रेण विदुध्वा उन्नतवलये तत्प्रमितोन्नतांशेषु मध्यरेखोपरि चिह्नितेषु भचक्रे व्यामिते नक्षत्रचक्रे स्थापिते नक्षत्रांशे ग्रहांशे च स्थापिते ग्रहांशाः स्फुटा भवन्ति अत्रोदाहरणम् । स्पष्टीकृतं रविवत्प्रियम् ।

अथ प्रकारान्तरेण इष्टकाले नक्षत्रोन्नतांशेभ्यो भौमादियहस्पष्टीकरणम् ।

राश्यावभीष्टग्रहऋक्षयोश्च
ज्ञात्वोन्नतांशान्निजभागसंस्थे ।
भास्ये ग्रहांस्तोन्नतभागभांशः
स्फुटो भवेत्तस्य तदा खगस्य ॥ २६ ॥

अस्य व्याख्या रजन्यामिष्टग्रहस्येष्टनक्षत्रस्य चोन्नतांशान् ज्ञात्वा भमुखे निजोन्नतांशेषु यो राशिभाग उपविशति स्थापिते सति लब्धेषु पूर्वापरकपालस्थितग्रहोन्नतांशेषु यो राशिभाग उपविशति तत्र ग्रहः साधनः स्फुटो भवति । अत्रोदाहरणम् । संवत् १४३५ प्रथमज्येष्ठशुक्लपूर्णिमायां गुरौ रात्रिगतघट्यः ६ पलानि १० तत्समये चित्रानक्षत्रस्यापरोन्नतांशाः ५५ तत्काले परकपाले भौमोन्नतांशाः ३० एवं चित्रानक्षत्रचक्रे लब्धोन्नतांशाभामुपरि न्यस्ते चित्रा-

For Private And Personal Use Only

द्वंयधुवतांशानामुपरि सिंहस्य द्वयमांशो लग्नः । ततो जातं भौमः सिंहराशेः द्वयमे ४।१० भागे सायनो वर्त्तते अयन-१४ विहीनः ३।२६ कर्कटे भवति एवं सर्वेऽपि ग्रहाः समानीयन्ते ।

अथ ग्रहभुक्त्यानयनम् ।

प्रसाध्यते काळयुगे मते चे-
त्स्फुटो ग्रहस्तर्हि तदन्तरं यत् ।
षड्भिर्हतं तद्द्युदलोद्धृतानं
दिक्सङ्गुण्यं तस्य गतिः कलाद्या ॥ २७ ॥

अस्य व्याख्या मतेऽभीष्टकालद्युगे पूर्वप्रहरान्ते चतुर्थप्रहरादौ च यदि स्फुटतानीयते तदा तदन्तरं यदस्ति तत् षड्भिर्हत्वा द्युदलेनोद्धृत्य तदाप्तं दशगुणं कुर्यात् एवं कृते तस्य ग्रहस्य कलाद्या गतिः स्यात् । यथोदाहरणम् । संवत् १४२५ ज्येष्ठशुक्ल १५ गुरौ प्राचीनलांशा रवेः ४२ दिनघट्यः ८ पलानि २६ समये स्फुटोऽर्कः सायनः २।०।४६।८ तृतीयप्रहरान्ते दिनगतघटी २५ पलानि १८ समये स्फुटोऽर्कः २।१।०।२७ इष्टकालार्कयोरन्तरं १४।१८ षड्भिर्गुणितं जातं ८५।४८ इदं दिनमानस्य अर्धेन १६।५२ भक्तं ततो लब्धं कलादि फलम् ५।५० दशगुणं कुर्यात् एवं कृते जाता रवेः स्फुटा गतिः कलादिका ५८।२० एवं सर्वेषामानयितव्यम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ चरदलानयनम्।

निरक्षभूजेऽथ कुजेऽर्कभागं
दत्त्वा मृगे चिन्हमिदं द्वयं स्यात्।
चरं हि तन्मध्यगतं हि सौम्यं
याम्यं भवेन्मेषतुलादितः स्यात्॥ २८॥

व्याख्या निरक्षभुजे तथा प्राकुजे अर्कभागे स्थापिते द्विःस्थानस्थे मृगाख्ये चिन्हद्वये कृते सति तन्मध्यगतं कालहस्ते यन्त्रवादि फलं लभ्यते तद्भवौ मेषादिषट्कस्थे सौम्यं तुलादिषट्कस्थे च याम्यं चरदलं भवति।

अथेष्टाचे परमचरदलानयनम्।

निरक्षभूजात्पुरतोऽथ साक्ष-
भूजान्तमध्यस्थगतं चरार्द्धम्।
* मार्गे स्पृशेयच च कालवृत्ते
ते स्युर्लवाः षड्विहृताश्च नाड्यः॥ २९॥
यथायथा साक्षकुजं निरक्षा-
त्पुरो व्रजेत्तच्च चरार्द्धवृद्धिः।
एवं कुजं याम्यदिशागतं स्या-
न्मृगादितस्तच्च परं चरार्द्धम्॥ ३०॥

* भूजं स्पृशेद्यचेति पाठान्तरम्।

For Private And Personal Use Only

चरे परे पञ्चदशाथ नाड्य-
श्चैकं दिनं षष्टिघटीप्रमाणम् ।
निशा च तावत्प्रमितैव भूया-
त्सौम्यं त्वजादेर्वणिजाच्च याम्यम् ॥ ३१ ॥

एषां व्याख्या सुगमा ॥

अथ दिनरात्रिमानानयनम् ।

सूर्यांशकं प्राक्क्षितिजे परे च
मुक्त्वा ततो मार्गमुखेऽङ्किते द्विः ।
छायान्तच्छिद्रान्तगतं दिनं स्या-
च्छेषाच्च निशा घटिकाः समस्ताः ॥ ३२ ॥

व्याख्या । सूर्यांशकं प्राक्क्षितिजे परे क्षितिजे च मुक्त्वा मृगमुखे स्थानद्वये प्रापिते तच्छिद्रद्वये पूर्वापरच्छिद्रान्तरगतं कालाहतौ दिनप्रमाणं घटीपलात्मकं भवति । तथैवाधःस्थितं शेषं रात्रिमानस्य घटिकादिकं स्यात् ।

अथायनांशाः ।

यन्त्रेन्द्रमध्योन्नतभागकेभ्यो-
देशे निजे योऽस्ति परिस्फुटोऽर्कः ।
सिद्धान्तयुक्त्यापि च साधितो य-
स्तद्विप्रयोगादयनांशकाः स्युः ॥ ३३ ॥

व्याख्या इष्टदिने यन्त्रेण मध्याह्नोन्नतांशेभ्योऽर्कें स्फुटीकृते सिद्धान्तयुक्त्यापि स्फुटीकृते उभयोर्यदन्तरं भागाद्यं त एव तत्र वर्षे अयनांशका भवन्ति ।

अथ ग्रहयुत्यानयनम् ।

शीघ्रस्य मन्दस्य च खेचरस्य
लब्धोन्नतांशान्तरमेकगत्योः ।
गत्यन्तरेणापहृते तयोश्च
विभिन्नगत्योर्गतियोगकेन ॥ ३४ ॥
लब्धं फलं वासरनाडिकाद्यं
मन्दाग्रतं स्यादधिकांशकस्य ।
शीघ्रस्य हीनांशजुषश्च गम्यं
युतिक्षणः स्यादनयोः स एव ॥ ३५ ॥

व्याख्या शीघ्रग्रहस्य मन्दग्रहस्योन्नतांशान् गृहीत्वान्तरं विधाय एकगत्योर्वक्राऽवक्रयोर्गत्यन्तरेण तदन्तरं विभजेत् विभिन्नगत्योश्च गतियोगेन हरेत् । इत्थं लब्धफलं दिनाद्यं भवति । इदमेव मन्दग्रहाच्छीघ्रग्रहेऽधिकांशे सति गम्यं वेदितव्यम् । अनयोर्मन्दशीघ्रयोर्युतिकालः स एव । अथोदाहरणम् । संवत् १४१४ पौषशुक्ल १५ भौमे सायनः स्फुटो गुरुः ७।२०।५४ भुक्तिः ११।० शुक्रः ७।१७।० भुक्तिः ६५।० एतस्मिन् दिने रात्रिशेषघटी २ पल ३० समये शुक्रशीघ्रग-

Shri Mahavir Jain Aradhana Kendra　www.kobatirth.org　Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टयोरन्तरांशाः प्राप्ताः २५ एतस्मिन् काले मन्दो जीवस्तदुन्न-तांशाः प्राप्ताः २२ उभयोरन्तरं ३ षष्ट्या सवर्ण्य १८० द्वयो-र्मार्गीत्वाङ्कुलान्तरेण ५४ भागे लब्धो दिनादिकालः ३।२० अत्र मन्दात्कौजस्य वीनांशकत्वात् एषः कालः । एतावता तृतीयदिवसे शुक्रवासरे दिनगतघट्यः २०।० शुक्रगुर्वो-र्युतिकालः ।

अथ वर्त्तमानवर्षस्य लग्नादागामिवर्षलग्नानयनमाह ।

पूर्वं कुजेऽभीप्सितवर्षलग्नं
निवेश्य मार्गान्नमङ्कयित्वा ।
ततोंशकेऽन्यङ्क ८३ मिते धृतेऽस्मिन्
भाव्यब्दलग्नं स्फुटमैन्द्रभूजे ॥ ३६ ॥

व्याख्या पूर्वं कुजेऽभीप्सितवर्षलग्नं निवेश्य मृगमुखं च चिन्हयित्वा अन्याङ्क ८३ मिते त्रिनवतिप्रमितेंशके असि-तकरानने धृते सति भाविवर्षलग्नमैन्द्रभुजे स्फुटं भवति । अत्रोदाहरणम् संवत् १४३४ सायनमेषसंक्रान्तिदिने सा-यनोऽर्कः ११।१८।५७।० एवं घट्यः २७ पलानि ३० संक्रम-णकालः तदा यत्सायनं लग्नं तद्वर्षलग्नमुच्यते ५।२१।२१।१८ अस्माल्लग्नादग्रिमवर्षे १४३५ सायनमेषसंक्रान्तिदिने साय-नं लग्नमानीयते लग्नांशे ५।२१ प्राक्कुजे निहिते मकरानने साष्टषष्टिशतकोष्ठकान्ते लग्ने चिन्हे कृते तदग्रे वन्हिनन्दमि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेष्वङ्केषु गणितेषु २६१ प्रमितानामुपरि मकरमुखे समानीते प्राकुजेऽभीष्टवर्षस्य सायनं धनुर्लग्नमुपरिष्टं ८।१०।५५।५ तदागामि वर्षलग्नं ज्ञेयं एवं सर्वाण्यपि समानेतव्यानि।

अथ देशान्तरसंस्कारेण स्फुटलग्नानयनमाह।

मध्यस्थरेखात ऋणं धनं स्या-
त्पलादि पूर्वापरदिग्विभागे।
ततः स्थिते प्राक्क्षितिजे भभागे
कुर्वीत चिन्हं मकराननाग्रे ॥ ३७ ॥
पश्चात्पुरस्थास्य ऋणे धने च
तद्देशमानेन धृते मृगास्ये।
प्रग्भूजभागिष्टपुरे विलग्नं
तदा हि देशान्तरसंस्कृतं स्यात् ॥ ३८ ॥

अनयोर्व्याख्या सिद्धान्तकरणोक्तविधिना धट्यादीनां पलानां देशान्तरं पलाद्यात्मकं लब्धं तन्मध्यगतो मेरुपर्यन्त-मध्यरेखातोऽभीष्टस्थानागपरवशेन ऋणं धनं भवति। अथ रवेर्देशान्तरं पलाद्यात्मकमागतं लग्नस्यापि तदेव ज्ञेयं प्राक्कुजे भभागे लग्नांशे स्थिते सति मकरमुखं चिन्हनीयं ततो यदि देशान्तरं ऋणगतं भवति तदा रविदेशा-न्तरमानेन पश्चाच्चिन्हं कार्यं धनगं चेत्पुरस्ताच्चिन्हं कार्यं एव-मुभयोर्मध्ये एकत्र मृगानने धृते सति प्राक्कुजे देशान्तरसं-स्कृतमिष्टपुरस्य विलग्नं भवति।

For Private And Personal Use Only

अथ नक्षत्राणां सौम्ययाम्यक्रान्तिज्ञानम् ।

मध्याह्नरेखोपरि भस्य वक्त्रं
कुलीरमेषान्तरगं यदि स्यात् ।
सौम्या तदा क्रान्तिरिदं च मेष-
मृगान्तरस्थं यदि दक्षिणा स्यात् ॥ ३९ ॥

अस्य व्याख्या यन्त्रस्य मध्याह्नरेखोपरि भवक्त्रं नक्षत्रवक्त्रं कृत्वा विलोकनीयं यदि तत्कर्कमेषान्तरस्थं तदा तस्य नक्षत्रस्य उत्तरा क्रान्तिः । इदमेव नक्षत्रमुखं यदि मेषमकरान्तरस्थं तदा तस्य नक्षत्रस्य दक्षिणा क्रान्तिः स्यादिति ।

अथ यन्त्रस्थितांशेभ्यः इष्टांशानां लग्नानयनम् ।

यन्त्रस्थितांशगणादभीष्टा-
ंशैर्विलग्नस्य विधिं ब्रवीमि ।
लग्नं च तचोन्नतभागकेभ्यः
प्राग्वत्ततः क्रान्तिरियं च गुण्या ॥ ४० ॥
चक्रांशयोरन्तरकेन भक्ता
परापमेनाप्तमिता लवादि ।
मृगाननात्प्राक्परतः प्रदेयं
सौम्यापमे यन्त्रभवाद्भभागात् ॥ ४१ ॥
न्यूनाधिकेऽभीष्टपलांशके त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिष्टाद्यजं प्राक् जगं विलग्नम् ।
याम्यापमे व्यत्ययतः समस्त-
मिदं विचार्य्यं गणकोत्तमेन ॥ ४२ ॥

त्रिभिर्विशेषकं एषां व्याख्या यन्त्रस्थिताद्यांशगणाद्यथा इष्टाद्यांशैर्लग्नमायाति तथा विधिं ब्रवीमि कथयामि तत्र ततो लग्नं प्राग्वदुक्तांशेभ्यः समानीय मृगानने चिह्नं कृत्वा लग्नात्सौम्ययाम्यक्रान्त्यानयनम् । इयं क्रान्तिरद्यांशकयोर-न्तरकेन गुण्या कोऽर्थः यन्त्रस्थिताद्यांशानां तथेष्टाद्यां-शानां अन्तरेण हन्यात् ततः परापमेन परमक्रान्त्या भाज्या च ततः प्राप्तमंशादि फलं मृगाननात् प्राक्परतश्च देयं कोऽर्थः यन्त्रे प्रागानीतलग्नसमये मृगास्यं लग्नं भवति । तच्चिह्नात्पृष्ठतोऽग्रतश्च देयमित्यर्थः सौम्यापमे सौम्यक्रान्तौ यन्त्राद्यांशात् न्यूनेऽधिके इष्टाद्यांशे मृगाननात्प्राक् पृष्ठतश्च चिह्नं कार्यं एवं कृते सति प्राकुजे यल्लग्नमुपविशति तद्दि-ष्टाद्यजं लग्नं भवतीति इदं समस्तं पूर्वोक्तं याम्यापमे विपरीतं कोऽर्थः याम्यापमे यन्त्राद्यांशेभ्यः इष्टाद्यांशे न्यूना-धिके सति पूर्वकृतमृगास्यचिह्नात्परतः प्रदेयमिति गणको-त्तमेन ज्योतिर्वित्तमेन विचार्यम् । अस्योदाहरणम् । यन्त्र-स्थिताद्यांशाः २८।३९ इष्टाद्यांशाः २४।० अथ सूर्योन्नतांशाः प्राच्याः ६६ पश्चात् लग्नं साधितं क्रमादौ सूर्ये सति १।०।०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्कलग्नं च ३।२१।० प्राकुजे निविष्टं मकरमुखे चिन्हं कार्यं अथास्मान्निवृत्तया १२१५।५४ भंग्याख्यिका २०।१५।५४ एषां यन्त्राचेष्टाद्यांशयोर्वियोगेन ४।३८ ह्रता जाता ८१।१२ परमापक्रमेण २३।२५ भक्ता लब्धसंख्यादि फलं ३।४८ यन्त्रे प्राक्लग्नानयनसमये मकराननमुपविष्टमस्ति तस्माचिन्हा-दिदं फलं यन्त्रस्थिताद्यात् २५।३८ दृष्टांशे न्यूने २४।० प्राक्पूर्वतश्चिन्हे मकरमुखे धृते प्राकुजे कर्कलग्नं सायनं ३।१८ एवमन्यत्रापि समानेयम्।

अथ सदोदितनक्षत्रेभ्योऽभीष्टदेशस्याद्यांशानयनम्।

सदोदितर्क्षं तलगोर्ध्वगं स्यात्
द्विधा दिवारात्रमतद्गतांशान्।
ज्ञात्वा च संयोज्य च तैः पलांशा-
स्त्वर्धीकृतैरिष्टपुरे भवन्ति ॥ ४३ ॥

व्याख्या इष्टपुरेऽक्षांशा भवन्ति कया रीत्या सदोदितर्क्षं तलगं ऊर्ध्वगं च यदा भवति कोऽर्थः। यदा ध्रुवमण्डलभ्रम-णात्मधः समायाति तदा तत्सदोदितनक्षत्रं परमाल्पोन्न-तांशज्ञानार्थं मुहुर्मुहुर्विद्ध्वा पुनस्तदेव ध्रुवमण्डलभ्रमणं यदा ऊर्ध्वं गच्छति तदा पुनरपि परमोन्नतांशज्ञानार्थं मुहुस्तदेव सदोदितर्क्षं विद्ध्वा स्थानद्वयागतोन्नतांशानि-कीकृत्यार्धीकरणे इष्टदेशाक्षांशा भवन्ति विशेषार्थं अत्रां-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यन्मानं भुवात् भुवस्थानं तु केन्द्रभूतमिति सूक्ष्मत्वेन दुर्लक्ष्यं अतस्तत्स्थानज्ञानार्थं सदोदितचं सदोदितचंताकेवककरणम-या वारद्वयवेधनाच्च केन्द्राभिधमध्यस्थानमानेयमिति तात्पर्यार्थः । उदाहरणम् । इष्टस्थाने भुवमण्डले चार्धगे यन्त्रेण सदोदितवेधेन प्राप्ताः उन्नतांशाः ३१ ततस्तस्मिन्नेवाधोगते पुनरपि सदोदितवेधनात्प्राप्ता उन्नतांशाः २५ उभयोर्योगे ५६ अर्धीकृते २८ अतो ज्ञातं योगिनीपुरे अक्षांशाः २८ विद्यन्ते एवं सर्वत्र ज्ञेयम् ।

अथ दृक्कर्मसंस्कृतनक्षत्रानयनम् ।

मध्याह्नरेखोपरि भास्य भागे
न्यस्ते च योंशोऽस्ति भमण्डलस्य ।
सुसंस्कृतं तत्र हि राशिभागे
स्फुटं भवेत्सायनकं तदृक्षम् ॥ ४४ ॥

भूजद्वयस्योपरि भास्यदेशे
धृते भवेद्यः खलु राशिभागः ।
तदृक्षसम्बन्धवशेन भस्य
स्यातां क्रमादभ्युदयास्तलग्ने ॥ ४५ ॥

व्याख्या यन्त्रे मध्याह्नरेखायां भास्यभागे नक्षत्रवक्षप्रदेशे धृते सति भमण्डलस्य राशिमण्डलस्य योंशोऽस्ति तत्र राशिभागे तदृक्षं तन्नक्षत्रं सुसंस्कृतं सायनकं दृक्कर्मशुद्धं भव-

For Private And Personal Use Only

ति । तथैव तस्मिन्नक्षत्रवंशे पूर्वापरभूजरेखोपरि धृते सत्यु-
भयत्रापि यौ राशिभागौ लगतः तद्वशसम्बन्धवशेन अस्य
नक्षत्रस्योदयास्तलग्ने क्रमेण स्यातां भवतः ।

अथ यन्त्रेण तिथिनक्षत्रयोगानयनम् ।

कुक्षौ निरक्षे रविचन्द्रभाग-
न्यासान्मृगास्याङ्कितयष्टिचिन्हे ।
कृत्वा द्युमध्यात्परतोऽरुणोने
चन्द्रेऽर्कभक्ते तिथयो विलब्धाः ॥ ४६ ॥

द्युमध्यरेखाङ्कशशाङ्कचिन्हा-
न्तरे त्रि ३ निघ्ने खचतु ४० विभक्ते ।
यदाप्यते तद्गणतोऽश्विधिष्ण्या-
त्फलं गतं स्यात्किल कालदृष्टे ॥ ४७ ॥

रव्यङ्कपीयूषकराङ्कयोगे
रामाहते खाब्धिभि ४० हृते च ।
यातं गतं स्यात्किल योगवृन्दे
शोध्यं भचक्राभ्यधिके तु चक्रम् ॥ ४८ ॥

गतं विशुद्धं निजभागहारा-
देष्यं भवेत्तन्निहतं च षष्ट्या ।

चन्द्रार्कभुक्त्यन्तरभक्तमेवं
लब्धं दिनाद्यं सकलं तिथेः स्युः ॥ ४९ ॥
इष्ट्यत्यतीते च भजी खषड्भि- ६०
र्हते विलिप्तेन्दुविभुक्तिभक्ते ।
दिनादिकं स्यात्किल योगजं च
षष्ट्या हते सूर्यशशाङ्कभुक्त्योः ॥ ५० ॥
योगेन रामापहृतेन भक्ते
लब्धं दिनाद्यं फलमेवमेव ।
ग्रहे भवेद्दोर्दयिकोऽर्द्धरात्रे
भवेच्च मिश्रेण सुसंस्कृतं तत् ॥ ५१ ॥

एषां व्याख्या निरले कुर्वे प्राक्परिच्छेदोक्तां स्पष्टं रव्यंशकं चन्द्रांशकं च निवेश्य कालहस्ते स्थानद्वयमार्गे मृगास्यचिन्हं कार्यं गणना तु युगभ्यासाभ्यांकरेखायाः पट्टकादन्यादिक्रमेण कार्या चन्द्रेऽस्तगेऽपि सति कोऽर्थः सूर्योऽपि निरक्षभूलोपरि हृते सति मकराननं यत्र लगति तदङ्कप्रमिताः सूर्यांशकाः कथ्यन्ते एवं चन्द्रांशे निरक्षभूलस्थे यत्र मृगास्यं स्यात्ते चन्द्रांशाः तेभ्यो रव्यंशकाः पात्यन्ते यदि न पतन्ति तदा एतान् ३६० संयोज्य पात्यन्ते द्वादशभिर्भज्यन्ते तल्लब्धा शुक्लप्रतिपदादिगततिथयो भवन्ति ।

अथ नक्षत्रानयनम् । द्युमध्यरेखाङ्कशशाङ्कचिन्हान्तरे कोऽर्थः क । लङ्कातो मध्याङ्करेखातो यत्र चन्द्रानयनं लग्नं तावन्तश्चन्द्रांशा लब्धाः सन्ति तेषु विभिन्नेषु चत्वारिंशता विभक्ते यत्फलमाप्यते तदेव अश्विन्यादिगतनक्षत्राणि भवन्ति ।

अथ योगानयनम् । कालवृत्ते मकरानन्ताथात्सूर्याशचन्द्राङ्कयोर्योगसाधिते विभिर्हृते चत्वारिंशद्विभक्ते यल्लब्धं तदेव योगसन्दे विष्कुम्भादयो गतयोगा भवन्ति यदि योगे हृते सति भचक्राभ्यधिको भवति तदा षष्ट्यधिकशतत्रयं ३६० शोध्यम् । अथ तिथ्यादीनां घटिकानयनम् । गतं विशुद्धं निजभागहारात् कोऽर्थः तिथिनक्षत्रयोगादीनामानयनसमये तिथ्यादिषु लब्धेषु यच्छेषं तत्क्रमेण तेषां गतमभिधीयते तन्निजभागहाराच्छोध्यते गम्यमितिथ्यादीनां क्रमाङ्क्यं भवति । तद्गतं गम्यं वा षष्ट्या हते सूर्यचन्द्रभुक्त्यन्तरेण भक्ते एतस्माल्लब्धं तिथेर्विभाग्यं दिनघटीपलात्मकं सर्वमपि भवति इति तिथिः । अथ नक्षत्रम् । एवमपि गम्ये अतीते गते भजे नक्षत्रे खषड्भिः षष्ट्या गुणिते चिताडितया चन्द्रभुक्त्या भक्ते सति लब्धा नक्षत्रस्य दिनादिकं भवति । अथ योगः । योगस्य गतगम्ये षष्ट्या हते सूर्यशशाङ्कगतियोगेन रामापहतेन भक्ते लब्धं दिनाद्यं फलमीदृशिके सहे । एवमेवार्द्धराशिके तु मिश्रे वा संस्कृते कार्ये गतं विशोधयेत् मिश्रात् गम्यं मिश्रे नियोजयेदित्यादिना संस्कृत-

कार्यमित्यर्थः । अथ तिथ्यानयने उदाहरणम् । संवत् १४२२ चैत्रवदि ३० भौमे यन्त्रेण स्फुटौ रविचन्द्रौ अर्धरात्रिसमये साधितौ तत्रिरयणोऽर्कः ११।१४।४२ भुक्तिः ५९।२१ चन्द्रः ११।२०।२६ भुक्तिः ८३२।६ रव्यंशे निरक्षभूजोपरि कृते सति मकरागमनं कालवृत्ते मध्यरेखातः सार्धचतुश्चत्वारिंशदधिकशतत्रयांशेषु ३४४ लग्नं एवं चन्द्रांशे निरक्षभूजोपरि कृते सति मकरागमनं पञ्चाशदधिकशतत्रयांशेषु ३५०।२६ लग्नं एवं रव्यंशाः ३४४।४२ चन्द्रांशेभ्यः ३५०।२६ पतिताः जातमन्तरं ५।४३ एतद् द्वादशभिर्भक्तं लब्धं तिथिस्थाने शून्यं एतावता अमावास्या गततिथिः शेषाद्दिनादिफलं ०।२६।४० एतद्गतयातदिनमिश्रा ४४।५८ द्विशोध्य जातं चैत्रामावास्याप्रमाणं घटी १८ पल १८ एवं सर्वत्राप्यानेतव्यम् । अथ नक्षत्रानयने उदाहरणम् । तिथ्यानयने पूर्वं ये चन्द्रांशाः ३५०।२६ आनीताः सन्ति ते त्रिगुणिता जाताः १०५१।१८ एते चत्वारिंशता ४० भक्ताः लब्धमश्विन्यादिगतनक्षत्राणि २६ शेषमस्यैव गतं ११।१८ ततो दिनादि ०।१६।२८ एतद्गतयातदिनमिश्रात् ४४।५८ विशोध्य जातं चैत्रामावास्यायां उत्तराभाद्रपदा नक्षत्रघटी ०।२८।२९ प्रमाणं प्राप्तं एवं सर्वत्र । योगानयने उदाहरणम् । पूर्वानीताः सूर्यांशाः ३४४।४२ चन्द्रांशाः ३५०।२६ उभयोर्योगे ६९५।८ अत्र चक्राधिकत्वात् चक्रांशान् अपा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्य शेषांशाः ३२५।८ एते त्रिगुणिताः २००५।२७ चत्वारिं-शता ४० विभक्ताः प्राप्ता विष्कुम्भादयो गतयोगाः २५ अस्यैव गतं ५।२७ सवर्णने जातं ३२७ एतत्त्रिगुणिते चन्द्रार्कभुक्तियोगेन २६७१।११ भज्यते । लब्धं दिनादि फलं ०।७।२० एतद्गतवशात् दिनमिश्रात् ४४।५८ अपास्य जातं चैत्रमावास्यायां ब्रह्मनामयोगो घटी २७ पल ३८ वर्त्तते एवं सर्वत्र । अत्र तद्दिने सूर्यसिद्धान्ते चैत्री अमावास्या घटीका १७।३५ उत्तराभाद्रपदा घटी २७।३७ ब्रह्मनामयोगे घट्यः ३६ पलानि ४० प्रमाणो वर्त्तते । तिथ्यन्तरं पलानि ५३ नक्षत्रान्तरं प ६२ ब्रह्मयोगान्तरं प ५८ प्रमाणमस्ति । परं यन्त्रान्तरत्वान्न दोषः एवं सर्वत्र ज्ञेयम् ।

अथ द्वादशाङ्गुलशङ्कुतः सप्ताङ्गुलशङ्कोः छायानयनम् ।

शङ्कुप्रभा मुनिहता रविभिर्विभक्ता
प्राप्तं यदत्र सकलं फलमङ्गुलाद्यम् ।
द्विःस्थं च तद्भवति सप्तमितस्य शङ्कोः
छायाफलं स्फुटतरं गणकैर्निबद्धम् ॥ ५२ ॥

अस्य व्याख्या द्वादशाङ्गुलशङ्कोः छायाफलव्यासः प्राप्ता सा सप्तभिर्गुण्यते द्वादशभिर्भज्यते ततः प्राप्तं अङ्गुलादि-फलं सप्ताङ्गुलशङ्कोः छाया भवति । उदाहरणम् । द्वादशाङ्गुल-शङ्कोः छाया १४।१० सप्तभिर्गुणिता जाता ९९।१० द्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशभिर्भक्ता लब्धा अङ्गुलादिका सप्ताङ्गुलशङ्कोः छाया ६९।२६ एवं सर्वत्रापि ज्ञेयम्।

अथ सप्ताङ्गुलशङ्कोः द्वादशाङ्गुलशङ्कोः छायानयनम्।

सप्ताङ्गुलस्य प्रतिहत्य शङ्कोः
छायां पतङ्गैः १२ विभजेच्च शैलैः।
लब्धं फलं सूर्यमितस्य शङ्कोः
छायाङ्गुलाद्या गणकैः प्रदिष्टा ॥५३॥

अस्य व्याख्या सप्ताङ्गुलशङ्कोर्या फलज्यातः प्राप्ता तां द्वादशभिः प्रतिहत्य सप्तभिर्विभज्यते ततो लब्धं द्वादशाङ्गुलशङ्कोः छाया भवति। उदाहरणम्। सप्ताङ्गुलशङ्कोः छाया ६६। २६ द्वादशभिर्गुण्यते जाता ७८८।८० सप्तभिर्भज्यते लब्धं द्वादशाङ्गुलशङ्कोः छाया अङ्गुलाद्या ८८४।८० जायते। एवं सर्वत्राप्यानेतव्यम्।

अथेष्टोन्नतांशेभ्यो द्वादशाङ्गुलसप्ताङ्गुलछायानयनम्।

इष्टोन्नतांशान्नवतेर्विशोध्य
तद्भांशकोष्ठोदितयाङ्गृहीत्वा।
निजं निजं शङ्कुभवं च वर्गं
तया भजेदङ्गुलका प्रभेयम् ॥ ५४ ॥

For Private And Personal Use Only

अथ व्याख्या इष्टांशलांशावयवैर्विशोध्य पातयित्वा तच्छायां फलच्छाकोष्ठकद्वयाद्गृहीत्वा तथा निजं निजं अङ्गुलवर्गं विभजेत्। एवं अङ्गुलद्वयस्य कृते इष्टोन्नतांशानां अङ्गुलद्वयस्य अङ्गुलाद्या छाया भवति। अथोदाहरणम्। यथा इष्टोन्नतांशाः १२ तेषां द्वादशाङ्गुलयष्टेः छाया कियती भवति उन्नतांशा नवतेश्च्युताः ७८ एतेषां छाया पुस्तकलिखितफलच्छातः प्राप्ताङ्गुलाद्या २।२३ अनया द्वयङ्गुलयष्टुवर्गो १४४ विभज्यते लब्धा द्वादशाङ्गुलयष्टुच्छायाङ्गुलाद्या ५६।१८ अथ द्वादशोन्नतांशाः १२ एषां सप्ताङ्गुलयष्टेः कियती छाया भवति। उन्नतांशाः १२ एते नवतेः ९० च्युताः ७८ एतेषां छाया पुस्तकलिखितफलच्छातः सप्ताङ्गुलाद्या २।२९ अनया सप्ताङ्गुलयष्टुवर्गो ४९ विभज्यते ततो लब्धं द्वादशोन्नतांशानां सप्ताङ्गुलयष्टेः छायाङ्गुलाद्या २२।२ एवमन्यत्रापि समानेयम्।

अथ यन्त्रेण पर्वतप्राकारदेवतालयतोरणस्तम्भवृक्षादीनां दूरे दर्शनादुन्नतत्वमानमाह।

स्तम्भादिकानामनुविद्ध्य चाग्रं
यन्त्रेण नक्षत्रकुटस्थतायाः।
छाया खपादाग्रभुवं भुजाग्र-
मप्यङ्कयित्वा च तदुन्नतांशान्॥ ५५॥

ज्ञात्वाथ कोष्ठस्थितयाच्च शङ्कोः
छायां गृहीत्वान्यतरस्य चैकम्
क्षिपन् विकर्षन् सुधियाथ भूयो
भुजाग्रभागेन तदेव विद्ध्वा ॥ ५६ ॥
समङ्कयेद्भूमिमथास्य चिन्ह-
द्वयान्तरं सप्तसमाहतं च ।
सूर्याहतं वा निजमानयुक्तं
कृत्वा वदेदीप्सिततुङ्गतांशम् ॥ ५७ ॥

एषां व्याख्या स्तम्भादिकानां मग्रं यन्त्रेण नक्षत्रवद्विद्ध्वा तुङ्गताया अस्यै ज्ञानाय स्वपादाग्रभूमिं भुजाग्रं च चिन्हयित्वा तदुन्नतांशान् स्तम्भादीनां उन्नतांशान्विज्ञाय तावतामुन्नतभागानां मङ्गुलद्वयमध्ये अन्यतरस्यैकस्य छायाङ्गुलफलज्याकोष्ठकेभ्यो गृहीत्वा तत्र सुबुद्ध्या एकं क्षिपन्नथवा ततो विकर्षंस्तदुपरि नतांशोन्नतांशान् ज्ञात्वा भूयस्तदुपरि भुजाग्रमारोप्य भूमिस्थपूर्वचिन्हादग्रतः पृष्ठतश्च क्रममाणस्तदेव स्तम्भादीनामग्रं भुजाग्रछिद्रेण विद्ध्वा स्वपादाग्रभूमिमङ्कयेत् । चिन्हद्वयस्यान्तरं हस्तवितस्त्यङ्गुलाद्यं परिमापनमेकत्र स्थापयेत् । यदि सप्ताङ्गुलछाया गृहीता भवेत् तदा तदन्तरं सप्तभिर्हन्यते यद्यन्यस्य तदा द्वादशभिः एवं कृते सति नि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लवयुमानं तत्र संयोज्य यः पश्चिमत. समीहितस्थानस्य तुक्तौ वदेत् । अत्रोदाहरणम् । तीरथादेः शिरसि नक्षत्रविहिते लब्धाः लवतांशाः ६६ तदा दैवज्ञेन धरणीस्थस्वपादाग्रे चिह्निते फलस्थाकोष्ठकेषु दृष्टेषु षट्षष्टिभागानां द्वादशाङ्गुलशङ्कोः छायाङ्गुलाद्या लब्धा ५।२१ यत्रैकस्मिन्स्वमुद्रस्याचिते जाता छाया ५।२१ यत्र फलस्थाकोष्ठके ईदृशी छाया भवति स कोष्ठके ज्ञेयः तदुपरि ये लवतांशा वर्तन्ते ते ग्राह्याः ततोऽत्र यथामङ्गुलानामुपरि प्राप्ता लवतांशाः ६२ एषूनतांशेषु भुजाग्रमारोप्य पूर्वस्थानाद्गतः पश्चाद्वा तथा भ्राम्यति यथा भूयोऽप्युक्तस्थानस्य शिरो नक्षत्रविहिष्यति पुनः स्वपादाग्रे चिह्निते पूर्वापरचिह्नयोरन्तरं प्राप्तं हस्ताः ६ एतस्मिन् द्वादशभिर्हते स्ववपुर्मानहस्तत्रययुक्ते च जाताः ७५ एतदीहितस्थानस्योन्नतामानमागतं एवं सर्वत्र करणीयम् ।

अथ यन्त्रेण भौमादिपञ्चकस्योदयमाह ।

सौरं स्वं प्राक्क्षितिजे निधाय
चिह्नं मृगाग्राद्य कालवृत्ते ।
कुर्यादभीष्टस्य खगस्य कान्तां-
शकेषु वामं मकराननं च ॥ ५८ ॥
कृत्वा स्थयेत्पूर्वकुजे भवेद्यत्
तल्लग्नमस्योदयगं ग्रहस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रहेऽथ वक्रे विभजेद्ब्रखेटा-
न्तरं खगोष्णांशुविभुक्तियुत्या ॥ ५९ ॥
मार्गस्थिते तच्च गभस्तिखेट-
भुक्त्यन्तरेणासमिदं च कुर्यात् ।
लब्धं दिनादिस्तु फलं ग्रहस्य
कालः स च स्यादुदयाभिधानः ॥ ६० ॥

त्रिभिर्विशेषं व्याख्या सौरं लग्नं सूर्योंशं प्राक्चितिजे उदयरेखायां निधाय कालहत्ते यत्र मृगास्यं लग्नं भवति तत्र चिह्नं कुर्यात् तदनु तस्माच्चिह्नादभीष्टग्रहस्य कालांशकेषु वामतःप्रदक्षिणं चिह्नं कृत्वा मकरानन्तं स्थापयेत् । एवं कृते प्राक्जे यल्लग्नं सांशं लगति तल्लग्नं तस्य ग्रहस्यास्तोदयगं चायनं भवति ।

तच्च कालांशमानमिदम्। शुक्रगुरुशनिभौमबुधाः कालांशैर्थु-त्तरोत्तरैर्नवभिः शु ८ गु ११ बु १२ म १५ शं १७ एते उदय-कालांशा ज्ञेयाः ॥

अथ गतगम्यदिनघटीपलानयनम् ।

ततो लग्नग्रहयोरन्तरं वक्रावक्रस्थिते ग्रहे रविखेटभुक्तियोगेनान्तरेण वा भज्यते ततो लब्धोऽभीष्टग्रहस्योदये गम्य-माने दिनादिकालः स्यात् । लग्नादूने ग्रहे गतकालः स्यात् अधिके गम्य इति भावार्थः । इदमग्रे वक्ष्यते । अथो-

For Private And Personal Use Only

दाहरणम् । संवत् १४२४ माश्विनशुक्ल १५ गुरौ दिने घटि-
काचित्सलवे साधनौ रविशुक्रौ साधितौ रविः ६।२।२८।०
गतिः ५८।२८ शुक्रः ५।१८।३२।० गतिर्वक्रा २४।४२ र-
वर्षे प्राक्क्षितिजोपरि धृते मकरागमनं चतुःसप्तत्यधिक-
शते १७४ लग्नं तत्र चिह्ने कृते शुक्रस्योदयप्राक्स्थानम-
स्तं मानमन्दलेऽष्टौ कालांशास्तत्पूर्वचिह्नात्पृष्ठभागे
मधयित्वा मकरागमनं स्थाप्यम् । तत्र जाताः १६६ भागाः
एवं कृते प्राक्कुजे कन्यालग्नं साधनं ५।२४।० उपविष्टम्
एतच्छुक्रस्यास्तलग्नमुदयाख्यं लग्नशुक्रयोरन्तरं भागादि-
कं १ मध्या सवर्णितं ३०० शुक्रवक्राद्रविशुक्रगतियोगेन
८४।१० भक्तं ततो लब्धो दिनादिकालः ३।३४।१७ यदि
लग्नादूनो ग्रहस्तदा गतकालो यदि लग्नादधिकस्तदा
एष्यकालः गतं ३।३४।१७ मिश्रादेवं ४१।५ रूपादिशोध्य
तत माश्विनशुक्लैकादश्यां सोमे उदयाद्गतघटी - ०।१४८
तु तत्समये शुक्रोदयो जात इति सिद्धं एवमन्यत्रापि ।

अत्र प्रश्नेन भौमादिपञ्चकस्यास्तमानमाह ।

दृष्टेऽस्तनीष्टस्य खगस्य चास्त-
काले रवौ त्वोद्भवोन्नतांशान् ।
धिष्ण्यानन्तं तेषु निवेश्य चिन्हा-
त्कुजे परेऽभीष्टखगास्तलग्नम् ॥ ६१ ॥

ततोऽङ्कयित्वा मकरास्यमंशो-
र्भागं विधायापरभूजदेशे ।
पुनर्मृगास्ये प्रविधाय चिन्हं
चिन्हद्वयस्यान्तरजान् विभागान् ॥ ६२ ॥
कालांशकैरिष्टखगस्य हीना-
न्कृत्वाथ शेषं विभजेत्पुरावत् ।
रवेः खगश्चेदधिकस्तदैष्य-
कालो भवेद्धीनतरे गतोऽस्मिन् ॥ ६३ ॥

एषां व्याख्या इष्टे दिने इष्टग्रहस्यास्तसमये इष्टग्रहो-दयांशान् ज्ञात्वा तस्य ग्रहस्य चक्रं तेषु उन्नतांशेषु निवे-श्यापरक्षितिजस्थं इष्टग्रहस्यास्तलग्नं चिन्हयानीयात् । ततो मकराननं अङ्कयित्वा अंशोः सूर्यस्य भागमंशं अपरकुजे निवेश्य पुनर्मृगानने चिन्हं कृत्वा चिन्हद्वयस्य पूर्वापरचि-न्हयोरन्तरोत्पन्नान् भागानंशानिष्टग्रहस्य कालांशैर्हीनान्कृत्वा अथ शेषं पुरावद्विभजेत् । रवेश्चेदधिको ग्रहो भवति तदा एष्यकालः अथ हीनो भवति तदा गतकालः । अथोदाहर-णम् । संवत् १९२८ आश्विनकृष्ण ३० गुरौ दिनेऽर्धरात्रि-समये स्फुटौ रविशुक्रौ यन्त्रेण साधितौ रविः सायनः ५।१८ ५४ भुक्तिः ५८।४० शुक्रः ५।२६।३० भुक्तिर्वक्रा २०।२५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्काले शुक्रास्तसमये अयचनचनस्योनतांशाः प्राच्याः ६० तत्र नचत्रानने समानीतेऽपरकुजे शुक्रस्यास्तलग्नं साय-नं ५।२७।० लग्नं वर्त्तते मकराननं तु २९७ उपरि लग्नं तत्र चिन्हं कृत्वा रव्यंशमपरे कुजे निधाय मकरास्ये २३५ उपरि लग्ने सति चिन्हद्वयान्तरात् शुक्रस्य कालांशाः ८ पात्यन्ते बहुत्वान्न पतन्ति तद्यथाच्छेषमेवान्तरं सत्रर्क्षं भुक्ति-योगेन ८६।१५ भज्यते लब्धो दिनादिकालः १।२४।४२ यदि रवेरधिको यदस्तदैष्यकालः हीनस्तदा गतकालः अत्रैष्यकालः १२ ।।४२ एष्यत्वान्मिश्र ४५।२५ मध्ये योज्यते ६।२० जातं एतावता आश्विनशुक्ल २ शनौ घटी १० पलेषु समये शुक्रस्यास्तः पश्चिमायां भवति ।

परःशताः सन्तु कवीश्वराणां
स्वार्थोपपत्तौ गणितप्रबन्धाः ।
अस्माकमेतत्किल केवलाय
परोपकाराय निधानमत्र ॥ ६४ ॥

ग्रन्थेऽस्मिन्यन्त्रराजस्य गम्भीरेऽम्भोनिधाविव ।
दुर्बुद्धयो निमज्जन्ति कुग्राहपरिपीडिताः ॥ ६५ ॥
गुरूपदेशप्रबलं यानपात्रमिवाश्रिताः ।
सद्बुद्धयस्तरन्त्येव विविधं गणितं परम् ॥ ६६ ॥
विद्येयं महती प्रोक्ता गहने गणितागमे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुशिष्याय कृतघ्नाय दुष्टायैतान्न दीयते ॥६७॥

श्रीयन्त्रराजोपनिषन्निबद्धा
कण्ठे सतो मौक्तिकमालिकेव ।
तनोति शोभां परमां गुणाढ्यां
परीक्षकानां स्वोन्मुखतां नयन्ती ॥ ६८ ॥

सूर्याचन्द्रमसौ यावद्दीपायेते जगद्गृहे ।
ग्रन्थोऽयं यन्त्रराजस्य तावन्नन्दतु कोविदैः ॥६९॥

अभूद्भृगुपुरे वरे गणकचक्रचूडामणिः
कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः ।
तदीयपदशालिना विरचिते सुयन्त्रागमे
महेन्द्रगुरुणोदिताजनि विचारणा यन्त्रजा ॥७०॥

श्रीपीरोजमहेन्द्रसर्वगणकः प्रष्टो महेन्द्रप्रभु-
र्जातः सूरिवरस्तदीयचरणाम्भोजैकभृङ्गयुता ।
सूरिश्रीमलयेन्दुना विरचितेऽस्मिन्यन्त्रराजागम-
व्याख्याने प्रविचारणादिकथनाध्यायोऽगमत्पञ्चमः ॥

इति श्रीयन्त्रराजः सटीकः समाप्तः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशाय नमः ।

# प्रतिभाबोधकं

सुधाकरद्विवेदिरचितम् ।

नमामि रामं रमणीयरूप-
मकारि जीवाकृतिरत्र येन ।
अनेकरूपैकपरं प्रसादात्
तस्य ब्रुवे भूतलवृत्तरूपम् ॥ १ ॥
वृत्ताधारा केन्द्रिता भूतलाभ्यां
सूची लम्बे ये भवेतां त्रिबाहौ ।
तस्मिन् शीर्षाद्द्वौ भुजौ यस्य सूच्या-
माधारस्य व्यासरूपस्तृतीयः ॥ २ ॥
या स्याद्रेखा योगरूपा तयोः सा
तस्मिन् त्र्यस्रक्षातले लम्बरूपा ।
स्पष्टा विद्वन् वासनाऽस्यावबोध्या
रेखाजातक्षेत्रमित्यैव नूनम् ॥ ३ ॥

यथा भकग सूची यत्र भ शिरःस्थानं तथा तत्र भकग त्रिभुजं यस्य भक भग द्वौ भुजौ तृतीयो भुजः आधार-

For Private And Personal Use Only

वृत्तस्य व्यासेन कगसंख्येन समः । अथ अकग सूची घत-घट, जतडट धरातलाभ्यां छेदिता ये अकगधरातले लम्ब-



रूपे घतघट धरातलं आधारधरातलस्य समानान्तरं तदा तयोर्योगरेखा तदट अकग धरातले लम्बो भविष्यति (११ अ, ये १८) तदट रेखा अकग धरातले दबिन्दुगता कल्प्या तदा ∠टदड = ∠तदज = ∠स ∴ जड एकैव सरला तथैव घच अपि एकैव सरलरेखा । घतघट छेदनरूपं तु वृत्तमेव यतस्तद्धरातलमाधारधरातलसमानान्तरं तेन घद × चद = तद$^{2}$ अथ यदि जटडत छेदनरूपं च वृत्तं स्यात् तदा पूर्ववत् डद × जद = तद$^{2}$ रेखागणितस्य तृतीयाध्यायेन, ततः डद × जद = घद × चद आभ्यां $\frac{\text{जद}}{\text{घद}} = \frac{\text{चद}}{\text{डद}}$ अथ ∠घदच = ∠घदज ततः षष्ठाध्यायेन रेखागणितस्य, घदड त्रिभुजं चदज त्रिभुजं च मिथः सजातीयं तेन ∠घडद = ∠अचद परन्तु कग, घच रेखे मिथः समानान्तरे ततः ∠घडद = ∠अगक ।

एतेन

आधारवृत्तस्य दलं करोति य-

द्धरातलं शीर्षगतं च सूच्याः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेव खण्डं त्रिभुजाकृतं चे-
ल्लम्बो भवेत्तत्र धरातले च ॥ ४ ॥
तत्राधारे कोणमाने समाने
यर्हि स्तः स्वस्मातलम्बयस्ययोगात् ।
नूनाधारे कोणमाने नवीने
ये स्तस्ताभ्यां छेदनं तर्हि वृत्तम् ॥ ५ ॥
ते कोणमाने समदिग्गते वा
विभिन्नदिक्स्थे भवतः समाने ।
सदा विदा छेदनजातरूपं
वेद्यं तु नूनं वलयानुकारम् ॥ ६ ॥

इत्यादि सिध्यति ।

अथ गोलखण्डानां कस्य चिद्वृत्तस्य धरातले अन्येषां प्रतिभाज्ञानार्थं विधिः ।

निर्दिष्टवृत्तस्य धरातलं यत्
यत्पृष्ठकेन्द्रं च तदेकमत्र ।
वेद्यं क्रमात्तद्गणकेन नित्य-
माधारसंज्ञं निजदृष्टिचिन्हम् ॥ ७ ॥
गोलोद्भवानामिह मण्डलानां
पालीर्गता या निजदृष्टिचिन्हात् ।

For Private And Personal Use Only

रेखाः प्रलग्नाः किल यत्रयत्र
स्वाधारके स्युः प्रतिभात्र तेषाम् ॥ ८ ॥
यदाधारवृत्तस्य पृष्ठीयकेन्द्रं
स्वदृक्चिन्हभिन्नं तदेवात्र बोध्यम् ।
तदाधारवृत्तस्य पृष्ठीयकेन्द्रं
विधिं कुर्वता गोलविद्यावरेण ॥ ९ ॥

यथा गोलपृष्ठे किमपि चकगवृत्तं तदीयपृष्ठीयकेन्द्रं के दृक्चिन्हं इ आधारपृष्ठीयकेन्द्रनिर्दिष्टवृत्तपृष्ठीयकेन्द्र-




प्रोतमच्छवृत्तं इचगजचटसंज्ञं चटरेखा प्रोतवृत्ताधारवृत्तयोर्योगरेखा म गोलगर्भबिन्दुः । अथ दृक्चिन्हात् चकगवृत्त-पालिगतरेखाभिर्या सूची तत्र इगकत्रिभुजं तत्प्रोतवृत्तधरा-तलगतं तेन त्रिभुजधरातले चकगवृत्तस्य धरातलं लम्बरूपं तथाधारवृत्तस्य धरातलं च तत्र लम्बरूपं तद्योगरेखा कर्गं रेखा तदा ∠ इकग = इजगचापार्धसमं ( रेखागणितस्य तृतीयाध्यायेन ) ∠ पइग = पकगचापार्धसमं अस्य कोटिः = ∠इगं कं परन्तु पकगचापार्धकोटिः इजगचापार्धसमा तेन ∠इकग = ∠इ गं कं अतस्तच्छेदनरूपं वृत्तमेव पूर्वसिद्धान्तेन

अत्र कं गं व्यासः। अथ मकं = स $\frac{१}{२}$ घकज्या, अगं = स $\frac{१}{२}$ घगज्या वा, सकं = स $\frac{१}{२}$ (घकेज्या — केकज्या)। मगं = स $\frac{१}{२}$ (घकेज्या + केगज्या) ततः कगं = मगं − मकं एवं यदि इष्ट दृक्सूत्रं दृग्मण्डलादधो याति तदा तयोर्योगः प्रतिभाव्यासो ज्ञेयः।

अत्रास्य सूत्रावतारोऽयम्।

अभीष्टाधारवृत्तीयदृक्केन्द्रान्तरं हि यत्।
त्रिज्येष्टवृत्तविष्कम्भदलोनसहितं ततः ॥ १० ॥
तयोः खण्डके स्पर्शरेखे तयोर्य-
द्भवेदन्तरं व्यासमानं तदेव।
यदा स्यादृणं चापमानं तदा तु
तयोर्योगमानं भवेद्व्यासमानम् ॥ ११ ॥

अथ यथा विषुवद्वृत्तधरातले क्षितिजस्य प्रतिभाज्ञानमभीष्टं तदा तयोः वृत्तीयकेन्द्रान्तरं अक्षांशोननवतिः क्षितिजस्य व्यासदलं भवतिस्ततो त्रिज्येष्टवृत्तविष्कम्भदलोनसहितमित्यादिना ९० − अक्षां − ९० = − अक्षां = प्रथमस्पर्शगतं तथा ९० − अक्षां + ९० = १८० − अक्षां आभ्यां यदा स्यादृणं चापमानमित्यादिना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स $\frac{१}{२}$ (१८० − अभा) + स $\frac{१}{२}$ अभा = व्यासः आचार्येण बाधाधिसमरेखारूपमेव बुध्यास्वच्छं पूर्वं साधितं तेन व्यासदलं $= \frac{१}{२}$ (प्रद्यु + बिद्यु) गोलगर्भात् प्रतिभायाः केन्द्रान्तरं = व्यासद − बिद्यु $= \frac{१}{२}$ (प्रद्यु − बिद्यु) एतेन पलेर्विहीना मगनाष्टरूपा इत्याद्युपपन्नं भवति (द्रष्टव्यं बिचलारिंशत्पृष्ठे द्वादशवृत्तम्) अथवाधमाने बीजप्रक्रियया घनधीर्योगं विधायोपपत्तिर्बोध्या। अथात्र यदि बिकोणमितासमरेखे बिधाय योगः कार्यस्तदा स (९० − $\frac{१}{२}$ अभा) + स $\frac{१}{२}$ अभा

$$= कोस \frac{१}{२} म + स \frac{१}{२} म = \frac{बि \cdot कोज्या \frac{१}{२} म}{ज्या \frac{१}{२} म} + \frac{बि \cdot ज्या \frac{१}{२} म}{कोज्या \frac{१}{२} म} =$$

$$\frac{बि^{२}}{ज्या \frac{१}{२} म \; कोज्या \frac{१}{२} म} = \frac{२ बि^{२}}{ज्याम} \text{ वा व्यासदलं}$$

= कोछेम एवं गोलकेन्द्रात् प्रतिभाकेन्द्रान्तरं

$$= कोछेम − स \frac{१}{२} म = \frac{बि^{२}}{ज्याम} − \frac{बिज्या \frac{१}{२} म}{कोज्या \frac{१}{२} म} =$$

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



$$\frac{\text{त्रि}^{२}}{\text{२ ज्या}\frac{१}{२}\text{अ कोज्या}\frac{१}{२}\text{अ}} - \frac{\text{त्रि.ज्या}\frac{१}{२}\text{अ}}{\text{कोज्या}\frac{१}{२}\text{अ}} =$$

$$= \frac{\text{त्रि}^{२} - \text{२ त्रि ज्या}^{२}\frac{१}{२}\text{अ}}{\text{२ ज्या}\frac{१}{२}\text{अ}\cdot\text{कोज्या}\frac{१}{२}\text{अ}} = \frac{\text{त्रि}\left(\text{त्रि} - \text{२ज्या}^{२}\frac{१}{२}\text{अ}\right)\Big/\text{त्रि}}{\text{ज्या अ}}$$

$$= \frac{\text{त्रि}\cdot\text{कोज्या अ}}{\text{ज्या अ}} = \text{कोस्प अ} = \text{पृष्ठीयकेन्द्रान्तरस्य स्पर्शरेखा।}$$

पूर्वसिद्धं व्याससदलं च = कोछेअ = पृष्ठीयकेन्द्रान्तरस्य छेदनरेखा ।

अतः सूत्रम् ।

**आधारस्वमध्यवृत्तपृष्ठकेन्द्रान्तरस्य ये ।**
**छेदनस्पर्शरेखे ते व्यासकेन्द्रान्तरे ध्रुवम् ॥१२॥**

एवं यदि कस्यापि वृत्तस्य पृष्ठीयकेन्द्रं आधारपृष्ठकेन्द्रात् अतुल्यान्तरे कल्पयते तद्व्यासदलं च क तदा पूर्वयुक्त्या

$$\text{प्रतिभाव्यासमानं} = \text{स्प}\,\frac{१}{२}\,(\text{अ} + \text{क}) - \text{स्प}\,\frac{१}{२}\,(\text{अ} - \text{क})$$

$$= \frac{\text{त्रि}\cdot\text{ज्या}\frac{१}{२}(\text{अ}+\text{क})}{\text{कोज्या}\frac{१}{२}(\text{अ}+\text{क})} - \frac{\text{त्रि ज्या}\frac{१}{२}(\text{अ}-\text{क})}{\text{कोज्या}\frac{१}{२}(\text{अ}-\text{क})}$$

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



$$\frac{\text{त्रि}\left\{\text{कोज्या}\frac{1}{2}(\text{अ}-\text{क})\ \text{ज्या}\frac{1}{2}(\text{अ}+\text{क})\right\}}{\text{कोज्या}\frac{1}{2}(\text{अ}+\text{क})\ \text{कोज्या}\frac{1}{2}(\text{अ}-\text{क})}$$

$$-\frac{\text{त्रि}\left\{\text{कोज्या}\frac{1}{2}(\text{अ}+\text{क})\ \text{ज्या}\frac{1}{2}(\text{अ}+\text{क})\right\}}{\text{कोज्या}\frac{1}{2}(\text{अ}+\text{क})\ \text{कोज्या}\frac{1}{2}(\text{अ}-\text{क})}$$

$$=\frac{\text{त्रि}^{2}\ \text{ज्याक}}{\text{कोज्या}\frac{1}{2}(\text{अ}+\text{क})\ \text{कोज्या}\frac{1}{2}(\text{अ}-\text{क})}$$ ततो व्यासदलं

$$=\frac{\text{त्रि. ज्याक}}{\dfrac{२\,\text{कोज्या}\frac{1}{2}(\text{अ}+\text{क})\ \text{कोज्या}\frac{1}{2}(\text{अ}-\text{क})}{\text{त्रि}}}$$

$=\frac{\text{त्रि. ज्याक}}{\text{कोज्याअ}+\text{कोज्याक}}$ अनयैव युक्त्या गोलगर्भात् प्रतिभा-

याः केन्द्रान्तरं $=\frac{1}{2}\left\{\text{स्प}\frac{1}{2}(\text{अ}+\text{क})+\text{स्प}\frac{1}{2}(\text{अ}-\text{क})\right\}$

$$=\frac{\text{त्रिज्याअ}}{\text{कोज्याअ}+\text{कोज्याक}}$$

अतः सूत्राणि ।

**आधारः स्वेप्सितो यः स्यात्तयेष्टवलयं निजम् ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्पृष्ठकेन्द्रविवरं भुवसंज्ञं भवेदिह ॥ १३ ॥

स्ववृत्तविष्कम्भदलोत्थकोटि-
ज्यकान्विता सा ध्रुवकोटिजीवा ।
हारो भवेद्च तथा त्रिजीवा
गुणो महद्वृत्तभवा च कल्प्यः ॥ १४ ॥

स्ववृत्तविष्कम्भदलस्य जीवा
ध्रुवज्यका चाच गुणेन गुण्या ।
हारेण भक्ता प्रतिभाभवे स्तो-
व्यासार्द्धकेन्द्रान्तरमङ्ख्यके ते ॥ १५ ॥

अथैवं विषुवद्वृत्तधरातले क्रान्तिवृत्तस्य प्रतिभाज्ञानार्थं पूर्वोक्त्यैव तयोः पृष्ठकेन्द्रान्तरं त्रिगांशसमं तेन तत्प्रतिभाव्यासः

$$= \frac{\text{कोज्याजि}\cdot\text{त्रि}}{\text{त्रि} - \text{ज्याजि}} + \frac{\text{कोज्याजि}\cdot\text{त्रि}}{\text{त्रि} + \text{ज्याजि}}$$ तथा मकरवृ-

$$\text{त्तव्यासार्द्धं} = \frac{\text{कोज्याजि}\cdot\text{त्रि}}{\text{त्रि} - \text{ज्याजि}}$$ ततोऽनुपातो यदि मकरवृ-

त्तव्यासे त्रिंशदंशास्तदा क्रान्तिवृत्ते किं जातस्तत्प्रजातीयो

$$\text{ग्रासः} = ३० \left\{ १ + \frac{\text{त्रि} - \text{ज्याजि}}{(\text{त्रि} + \text{ज्याजि})} \right\}$$

For Private And Personal Use Only

$$= २\cdot\left\{\frac{\text{कोज्याजि}}{\text{कोज्याजि}}+\frac{\text{कोज्याजि}\cdot\text{कोउज्याजि}}{\text{कोज्याजि}\ (\text{त्रि}+\text{ज्याजि})}\right\}$$

$$= २\cdot\left\{\frac{\text{कोज्याजि}+\dfrac{\text{कोज्याजि}\cdot\text{कोउज्याजि}}{(\text{त्रि}+\text{ज्याजि})}}{\text{कोज्याजि}}\right\}$$

अत एकसमतिपृष्ठस्थपरापमानां नरभागमौर्वी इत्याद्युपपन्नं अन्तरे कृते केन्द्रान्तरं चोपपन्नं भवति। एवं बहवः प्रकारा अनेन सिद्ध्यन्ति किं लिखनविस्तरेण। एवं पूर्वोक्तयुक्त्यैव गोलस्पर्शरेखयोर्द्वयोर्योगेन यः कोणः स एव तत्प्रतिभारेखयोरुत्पन्नकोणस्तथा या रेखा गोलवृत्ते स्पर्शरेखा तत्प्रतिभा च तत्प्रतिभावृत्ते स्पर्शरेखा। यद्व्यासमितिरनन्ता सा प्रतिभा सरलरेखैव।

प्रतिभाबोधकमिदं संक्षेपेण कृतं स्फुटम्।
सुधाकरेण धीमद्भिर्बुद्ध्या ज्ञेयं विशेषतः ॥१६॥

शराङ्कसप्तेन्दुशके व्यतीते
सुधाकरेणैतदकारि तुष्ट्यै।
यन्त्रप्रचारागमपण्डितानां
श्रीजानकीजानिकृपावलम्बात् ॥ १७ ॥

इति श्रीसुधाकरद्विवेदिकृतं प्रतिभाबोधकं